Apte's Progressive Exercises

Sanskrit Translation

OF

Apte's Progressive Exercises,

PART I

(Designed for F. A. Students of the Punjab University)

Containing thorough explanatory notes, copious etymological meanings, a comprehensive vocabulary and an Appendix on University Papers

BY

CHARAN DASS, VIDYARTHI.

REVISED BY

P. BHAGAT RAM, SHASTRI, VED TIRATH,

Professor of Sanskrit,

D.A-V. College, Lahore.

1st. Edition. 1916. *Price annas.* 12

PRINTING WORKS, LAHORE.

श्रीमच्छिवरामहोदयेन दाक्षिणात्येन रचितस्याङ्गल-
पाठनिकरस्य प्राथमिकभागधेयस्य

संस्कृतेऽनुवादः

स च

श्रीरामकृष्णसूनुना होश्यारपुरज़िलान्तर्गता-
ऽहियापुरवास्तव्येन प्राज्ञपरीक्षोत्तीर्णेन

चरणदासेन वर्म्मणा

निर्मितः

सारस्वतसर्वस्वज्ञेन श्रीमद्भक्तरामशास्त्रिणा
वेदतीर्थेन च संशोधितः ।

लवपुरीये "पञ्जाब प्रिंटिंग वर्क्स" इति नाम्नि यन्त्रालये

मुद्रापयित्वा प्राकाश्यञ्च नीतः ।

प्रथमं संस्करणम्] [मूल्यम् पादोनरूप्यकः

PREFACE.

The compilation of the book requires a word of explanation.

It is prepared to help students in the work of translation in which they are generally far from the mark. Example is better than precept : No amount of memorising of a set of dry and stiff rules would do instead. The book embodies the translation of Apte's Exercises, Part 1 with that of University passages. The latter portion of the original in Sanskrit, being a familiarity, has been ignored.

Care has been taken that the rendering may be idiomatic and at once simple. Under each exercise have been given copious foot-notes: synonyms of words occurring, equivalent expressions and etimological meanings.

I have spared no pains to make the book useful to the F. A. Standard of the Punjab University, and I hope that it will be warmly received by all.

I am higly indebted to P. Bhagat Ram Sâstri, Ved Tirath for the pains he so kindly took in the revision of the book.

LAHORE :
Dated 1st October, 1916.

Charan Dass.

ओ३म्

❀ उपोद्घातः ❀

गीर्वाणवाग्गहनं प्रविविक्षूणां व्युत्पत्तिपेलवानामध्येतॄणां हिताय मयाल्पग्रन्थोयं निरमायि। श्रीमच्छिवराममहोदयेन दाक्षिणात्येन ग्रथितस्याङ्गलवाक्यव्रातस्यानुवादोयं व्यरचि।

अत्र प्रत्येकपाठस्य विख्यातपदप्रयोगतो विशुद्धा व्याकरणसम्मता अनुकृतिर्विधीयते।

अधोऽधः पाठं, प्रयुक्तशब्दानां निरुक्तिस्तेषां पर्यायवाचिनो विषमतरपर्यायवाक्यानि च प्रदर्शितानि सन्ति।

सर्वं पुस्तकस्थं विषयं यदि विद्यार्थिनः सम्यक् सावधानमधीयीरंस्तर्हि भूरिलाभं प्राप्नुयुरहञ्चामोघक्रियो भवेयमिति।

शब्दशास्त्रपारावारकृतावगाहा विपश्चितो यदि काञ्चित्त्रुटिमीक्षन्तां तदावेदयन्तु माम्—तेषामहं कोटिशो धन्यं वदिष्यामि कृतज्ञतया च स्मरिष्यामीत्यलं सहृदयहृदयेषु बुद्धिमद्धुर्य्येषु॥

गच्छतः स्खलनं क्वापि भवत्येव प्रमादतः।
हसन्ति दुर्जनास्तत्र समादधति सज्जनाः॥

इति विदुषां
चरणरेणुश्चरणदास वर्म्मा

DEDICATED

TO

My Father.

स्वपित्रे सादरं समर्पितोऽयं तदीयपरिचर्य्याशीलेन पादाम्बुजकृपाकांक्षिणा ग्रन्थकर्त्रा ।

॥ ओं ॥

सच्चिदानन्देश्वराय नमो नमः ।

अथानुवादः प्रारभ्यते ।

EXERCISE 1.

वयं मर्त्याः स्मः । स ग्रामं (संवसथं) गच्छति । पश्यामि शुकं (कीरं) वृक्षे । † किंकराः स्व स्वामिनं प्रशंसन्ति । स्तेनोधनं (द्रविणं, रिक्थं) चोरयति (मुष्णाति)। नरपतिः (नृपः, भूपतिः, नृपतिः, अवनिपतिः, भूभृत्) शठान् ताडयति प्राज्ञो धनं नाभिलषति । कवयो राज्ञां गुणान् वर्णयन्ति । सिंहो मानुषान भक्षयति (अत्ति) । त्वया सत्यं न ज्ञायते । योधौ (योद्धारौ) शरान् क्षिपतः । बालकः पानीयं पिबति । ईश्वरस्त्रिदशालये निवसति । नगरेषु न तिष्ठन्ति यतयः ।

सर्थं

NOTES ON EX. 1

† Servant=भृत्यः, अनुचरः, परिचारकः, भुजिष्यः, उपजीवी, शुश्रूषकः ।

सिंह is derived from हिंस् to kill; हिनस्तीतिसिंहः ईष्टेऽसौ ईश्वरः. It is formed by Panini's स्थेशभास-

पिसकसो वरच् i·e to root ईश् the Suffix वर is added in the sense of a doer.

Similarly we have भास्वर, स्थावर, पिस्वर, विकस्वर ।

The word मानुष is formed by Pàn: मनोर्जाता वञ्यतौषुक् च, i.e the word मनु takes the Suffix अञ् (अ) and the augment षुक् (ष).

The Etimology of त्रिदशालय is as follows:— त्रिदशानां आलय इति त्रिदशालयः। आसमन्तात् लीयतेऽस्मिन्निति आलयः = home; a dwelling.

i तिस्त्रो दशा बाल्यकौमार यौवनानि येषां ते ।

ii त्रिरावृत्ता (त्र्यधिकाश्च) दश (परिमाणं) येषां ते= 33 (gods).

iii त्रीन् (आध्यात्मिकादि तापान्) दशन्ति ये ते= who put an end to the three kinds of torment.

iv तृतीया एव दशा येषां ते ।

EXERCISE. 2

मनुष्यः पुत्रमाह्वयति(आकारयति)/कथमायासि मलिन-हस्ताभ्याम्? अलयो वसन्ति कमलेषु। नगरेषु †स्वर्णकारा विद्यन्ते ।

भिक्षुकावुञ्छतो यवान् । आवां कपिमेकं मार्गे पश्यावः । कदा निजगृहं (स्वकीयालयं) *व्रजसि ? किं त्वं मम सुहृन्नासि ? गोपालो ग्रामाद्धनस्य राशी नानयति । धनेन संतुष्टो नास्मि । प्राज्ञः संसारासारतां जानाति । तौ कलेवरं भूषाभिर्विभूषयतः। मार्जारो मूषकमत्ति । मूढा वेदानामर्थं न बोधन्ति । युवां रणेषु अरीञ्जयथः ॥

NOTES ON EXERCISE. 2

Dirty = मलिन, मलीमस, कलुषित ।

† The student should note पश्यतोहरः a peculiar equivalent of स्वर्णकार. It means one who helps himself to the property of another even under strict watch.

* By Pân : वर्तमानसामीप्ये वर्तमानवद्वा, the present Indefinite is sometimes used to denote near future.

EXERCISE 3.

नराः पादाभ्यां (पद्भ्यां) चलन्ति । † रामो वेदमन्त्रैऋषिं पूजयति । कथं पुरुषं लगुडेन ताडयसि ? मनुष्या * मुखैर्वदन्ति । आवां हस्तौ उष्णजलेन प्रक्षालयावः । सैनिका

आयुधैर्युध्यन्ते । कवयो राज्ञां विक्रमान् काव्यैः प्रस्तुवन्ति । केसरी पशुं नखैश्छिन्त्ति । हरेराज्ञानुरोधतो गृहं प्रविशावः । नाविको नौदण्डसाहाय्येन नावं चालयति । स वज्रेण गिरीन् खण्डयति । हस्तेन पत्रं लिखसि । वृषभः शृङ्गाभ्यां गिरिं विलिखति ॥

NOTES ON EXERCISE 3.

केसराणि केसरा वा सन्त्यस्येति केसरी = lion. पृणाति, पूरयति, पिपर्तीति पुरुषः ।

or पुरिशेते इति पुरुषः ।

† रमन्ते योगिनो ऽस्मिन्निति रामः । *

* Mouth=मुखं, वदनं,वक्त्रं, आननं,आस्यं,आसनम् ।

By Pân : पद्दन्नोमास्, पाद takes the substitute पद् and so on.

* This is the declination when the word means God or an incarnation of God.

EXERCISE. 4.

रामो ऽनुचराभ्यां सह ग्रामं गच्छति । ईश्वरो जागरूकेन चक्षुषा नरान् पश्यति । मानवो हस्ताभ्यां पुस्तकं गृह्णाति । स भिक्षुकेभ्यः फलानि प्रयच्छति । ते ग्रामात् फलपक्वशाखा आयान्ति । युवां वृक्षात्पुष्पाणि नयथः । पश्यसि पथिकं

† पर्वतस्य शिखरात् ? आवां फलेभ्यः प्रातरुद्यानं गच्छावः। * पापं जनयत्यभद्राणि । प्राज्ञशिष्या निजासनं नोज्झन्ति । अहं पुरुषाभ्यां स्वर्णमुद्रे ऽददाम् । हिमं शैलानां शिखरेभ्यः पतति । विना पुरुषकारेण नेप्सितं सिध्यति । ब्रह्मा मन्त्रैर्वरुणं मन्यवे आह्वयति । कवयो नृपेभ्यः काव्यैर्धनं लभन्ते । जलबिन्दवो (पयः पृषतः) ऽम्बरात्पतन्ति (गलन्ति) ।

NOTES ON EXERCISE. 4.

† It is equivalent to भूधरप्रस्थात् ; भूभृत्सानोः ।

N. B.—The word सानु is both mas. and neuter.

* This sentence is equal to पापादशुभानि जायन्ते । प्राज्ञः=प्रकर्षेण जानाति इति, By Pân. इगुपधज्ञाप्रीकिरः कः i e. to root ज्ञा the suffix क (अ) is added. ब्रह्मा = शम्भुः, शतधृतिः, स्रष्टा, परमेष्ठी ।

EXERCISE. 5.

स निजधनं गृहे निदधाति । बुधानां शब्दा आदरमर्हन्ति नृपाणां पुत्राः किंकरैः सह बहिर्गच्छन्ति । मनुष्यस्य आचारो निन्दनीयः (गर्ह्यः, याप्यः, वाच्यः)। मित्रैर्विनावयं न तुष्यामः ।

त्वं तमःकारणं ताडयसि । कन्दरे वसति भीषणो मृगेन्द्रः । ईश्वरो दुष्टनरान् पापेभ्यस्ताडयति । अस्मिञ्जगति सौख्यं नास्ति । सचिवा राज्ञोऽनुशासनादा † सनेषूपविशन्ति गृहमेधिनो नगरेषु वसन्ति यतयश्च वनेषु । भरतो नगरं सैनिकैर्जयति । रामस्य हृदय उत्साहो वर्तते ! पादपेषु पुष्पाण्यवलोकयामि ॥

NOTES ON EXERCISE 5.

सुखमेव

~~सुखस्य भावः~~ सौख्यम्

नियच्छतीन्द्रियाणीति यतिः ।

† आसनं is formed by Pan. ~~ण्यासश्रन्थोयुच्~~ i.e. to root आस् to sit, यु (अन) is added.

N.B.—The word कन्दर is both mas. and Femi—कन्दरे कन्दरायां वा ।

पद्भ्यां पिबतीति पादपः ॥

EXERCISE 6.

हे भ्रातः! पश्यसि त्वं मूषकम् ? किं स सारमेयस्तत्रस्थः तव चक्षुर्विषयः ? † मूर्खाः परमात्मनो महत्वं न जानन्ति (विदन्ति) । दुष्टा नराः सदोन्मार्गगामिनः । आवां रामस्य गृहं न विद्वः । शीततौं(शरदि)दिवसा अल्पीभवन्ति, निदाघे

(ग्रीष्मे, शुचौ) तु संवर्धन्ते । स निजोपदेशेन लोकान् न्याय्यपथं नयति । भूमिपस्य सचिवे कोपि गुणो न दृश्यते । युवाभ्यां आलेख्यं न रोचते । उपवनेप्वादपास्तुंगाः सन्ति । अहं गर्वाल्लगुडेन बालकं ताडयामि । यतयः पर्वतानां कन्दरासु परमात्मानं स्तुवन्ति । भृत्याः स्तेनं लगुडैस्ताडयन्ति ॥

NOTES ON EXERCISE 6.

सारमेयः—सरमाया अपत्यं पुमान् इति । 'स्त्रीभ्योढक्'।

† Fools:—मूढाः, वैधेयाः, वालिशाः ।

महत्वं = महिमानं ।

चक्षुः is from चक्ष् to tell, चष्टे इति चक्षुः ।

मुष्णातीति मूषकः । लोक्यते इति लोकः ।

Minister=अमात्यः, मन्त्री । अमा सह तिष्ठति इति अमात्यः=one who remains in close c mpanionship with the king.

* Lofty=प्रांशुः, उच्छ्रितः, उन्नतः, उद्धतः ।

EXERCISE 7.

कृषीवलाः क्षेत्रं (केदारं) गच्छन्ति । * ईश्वरादन्यः कोपि न श्लाघ्यः । विना पापं न किमपि गर्हणीयम् । सख्ये हैमनिष्कं यच्छति । अधिपतिर्भृत्यमा दिशति । भारतवार्षारण्ये

बहवः प्रतिभयाश्चतुष्पदो वसन्ति । प्रत्यहं रविरुदयते (उदेति)। किं त्वं चित्रे श्वानं पश्यसि ? योधाः खड्गैः (असिभिः) अरिभिर्युध्यन्ते । तव यत्ना विफला वर्तन्ते । शशिनः कौमुदी (चन्द्रप्रभा) वल्लभस्य दुःखदा भवति । शिवाय नमः। परमेश्वराय बहुमानं धारयामः । सोऽनुचरं तस्याऽनवधानात्संक्रुध्यति † । त्वं न्यायनियमान् न बुध्यसे उपाध्यायस्य साहाय्याद्ऋते । अस्मिन्नैहिकजीवने परितोषोऽभिनन्दनीयः ॥

NOTES ON EXERCISE 7.

* It is equal to ईश्वरादृते न किमपि स्तुत्यम्।

Lover=कामुकः, रमणः, वल्लभः, प्रियः ।

शिवाय=उमापतये, निटिलेक्षणाय,भालनेत्राय, त्र्यम्बकाय, त्रिपुरारये, पिनाकपाणये ।

† By pân: क्रुधद्रुहोरुपसृष्टयोः कर्म्म, the root क्रुध् takes the Accusative when preceded by a preposition, otherwise, the Dative.

EXERCISE 8.

न्याये विनिवेशितमना नृपो निरपराधिनं न दण्डयति । अस्मिन्नगरे (अस्यां पुरि) बहवः पुरुषा वित्तहीना दृश्यन्ते ।

मांसला रक्तकाः शठौ दण्डयन्ति । हरिः केवलमधीतेभ्यो ब्राह्मणेभ्यो (भूदेवेभ्यः) † धनं यच्छति । बहूनि (भूयांसि) कुसुमानि उन्नततरोः पतन्ति । धनिनां तनूजाः (तनुजाः, आत्मजाः, सूनवः) प्रायेण व्यवसायपरा न वर्तन्ते । बुधा अविविक्तेषु*सदनेषु न निवसन्ति ।

हे अन्ध ! कथं त्वं तस्य खलस्य ¶ समीपमेषि ? अध्यापको नृपस्य मूढपुत्रानुपदिशति । दुश्चेष्टिता वटवो खगेषु उपलान् क्षिपन्ति ॥

NOTES ON EXERCISE 8.

† Wealth=द्रविणं, द्रव्यं, द्युम्नं, ऋक्थं, रिक्थं, वसु ।

* House=गृहं, निकाय्यः, निलयः, आलयः, सद्म, निकेतनं, अगारम्, शरणं, निशान्तं, वस्त्यं, वेश्म ।

¶ near=संनिधिः, संनिकृष्टं, अभ्याशः, अभ्यर्णं, उपकण्ठं, अन्तिकम् ।

खे आकाशे गच्छतीति खगः ॥

EXERCISE 9.

व्यवसायात्मानो रामाय न रोचन्ते । दोषा तारका दिवि द्योतन्ते, किन्तु दिवा तिरोभवन्ति । सद्वृत्ता राजानः प्रजायाः श्रेयसे यतन्ते । यूयमतिथीन् दानैर्न मोदयथ । पुरोहितो

हुतभुजि यज्ञसमये घृतं जुहोति । उद्याने (आरामे, उपवने, वाटिकायां) पुष्पाणां (सुमनसां, कुसुमानां) सुरभिरामोदो वर्तते । तरवः ‡ पवनबलेन कम्पन्ते (वेपन्ते) । ईश्वराय पापं (व्यलीकं) न रोचते, सोऽपराधिनो दण्डयति । † कुशलेभ्यो बालकेभ्यः परिश्रमार्थं पारितोषिकाणि दीयन्ते । तस्य हृदयं शठ नाम श्रवणभयात् वेपते (स्पंदति, स्फुरति) । विद्या-प्रकाशो * मुनीनां हृदयेषु विद्यते । अनुचराः प्रीत्या (प्रेम्णा) अधिपतिं सेवन्ते । स निजाध्यापकस्योपदेशं नानुरुध्यते । कथं त्वं शिक्षकस्याग्रे (समक्षं,सविधे)अनृतं(अलीकं)भाषसे ? हरेरात्मजो बालैः क्रीडति रथ्यायाम् । ताततः शिशोरादरमपेक्षते । त्वं चित्रस्य सौन्दर्य्येण विस्मयसे ॥

NOTES ON EXERCISE 9

राजते शोभते इति राजा or रञ्जयति प्रजा इति । पुरोहितः=पुरोधाः । यज्ञसमये=होमवेलायां,क्रतुकाले । घृतं= आज्यं, हविः, सर्पिः ।

‡ Wind=अनिलः, वातः, मरुत्, मारुतः, वायुः, समीरणः, नभस्वान् । † This can be written as दक्षाश्छात्राः पारितोषिकाणि लभन्ते

Heart=हृदयं, हृद्, मानसं, मनः ।

* मुनयो मन्तारो वेदशास्त्रार्थं ज्ञातारः । By Pân: मनेरुच्च, the अ in म is changed to उ, and the suffix इन् (इ) is added to मन्.

EXERCISE 10.

सैनिकाः सेनान्यं (चमूपतिं) अनुरुध्यन्ते । विहगाः वृक्षशिखरेभ्य उड्डीयन्ते । अद्य रामस्यापराधं क्षमे । कथमुटज दर्शनेन मे दक्षिणं चक्षुः स्पन्दति । महात्मनां दण्डो न वर्तते कन्ये सावधानं नृत्यं शिक्षेते । तौ समुद्रजलं स्वादेते । साधवो विद्यार्थिनस्तावदध्यापकं वन्दन्ते तदनन्तरं स्वकीयाध्ययनमारभन्ते । दुष्ट पुरुषा मनुजानां अभ्युदयं न सहन्ते । प्रजा नृपस्य शासनमाद्रियन्ते । निदाघे तपनेनात्युष्णेन भूयते । † अध्यापकः शिष्याय पठनविधिमुपदिशति । शुका जनेभ्यो वचांसि अजस्रं श्रुत्वा पुंवद्भाषन्ते । गोविन्दस्य मित्राणि तस्योन्नतौ मोदन्ते ॥

NOTES ON EXERCISE 10.

Right=दक्षिणं, अपसव्यं, वामेतरं ।

† उपाध्यायः शिष्याय पठनक्रमं निर्दिशति ।

विहायसि गच्छतीति विहगः ।

N. B:—The word विधिः is always Mas. save somewhere in the Upnishads, where it is Femi.

EXERCISE 11

पादपस्थो विहगो दृश्यते मया। पथिकेन विहगो नालोक्यते। † तस्करा दण्ड्यन्ते नृपेण। प्रजाः सदैव नृपैरेव रक्ष्यन्ते। गोपालेन हरेः साहाय्येन कार्य्यं साध्यते। तौ निजगुरुणोपदिश्येते। अस्माकं कर्म्माणि परमात्मना ज्ञायन्ते। सर्वदैवेश्वरेण दृश्यामहे। तडागस्योदकं (सरसः, जलाशयस्य) पिपासुभिः पान्थैः पीयते। अधिपतिना निजाः प्रेष्या आदिश्यन्ते। रामेण अजा ग्रामं नीयन्ते। द्वाभ्यां व्याघ्राभ्यां पर्वते भूयते। भद्रशिष्येणाध्यापकस्यादेशाः पाल्यन्ते, विनीतेन च नैव श्रूयन्ते। योधस्य सारथिना रणे‡ पञ्चत्वमवाप्यते। बालकेन हस्ताभ्यां पुस्तके गृह्येते। सर्वे नृपतयो दमयन्त्याः स्वयंवर आहूयन्ते॥

NOTES ON EXERCISE 11

Bird=पक्षी, विहगः, विहंगमः, खगः, शकुन्तः, पतत्री।

† तत्करोतीति तस्करः, पारस्करादित्वात्सुट्।

Traveller=पथिकः, पान्थः, अध्वगः, अध्वन्यः, अध्वनीनः।

* Death=मृत्युः, मरणं, अवसानं, मृतिः, निधनं, पञ्चता ।

‡Contest=युद्धं, आयोधनं, जन्यं, प्रधनं, प्रविदारणं, मृधं, आस्कन्दनं संख्यं, समीकं, संपरायिकम् ।

N. B.—भू in the Passive case is always used in the 3rd person singular, when it is not preceded by a preposition.

EXERCISE 12.

जनैर्द्वे मित्रे वियुज्येते (त्यज्येते)। आवाभ्यामचार्यो वन्द्यते। नरेशैः शासनातिक्रमणं न क्षम्यते। ताभ्यां तातस्योपदेशोऽवज्ञायते। योधेन रणे शरैररयो हिंस्यन्ते। युवाभ्यां हरये सदाचारात्पारितोषिके दीयेते। वंगदेशे निरूपप्लवेन राज्येन भूयते। चौरैः पथि पथिका हन्यन्ते। गोविन्देन तौ न्याये परीक्ष्येते। सेनापतिना सैनिका युद्धायआदिश्यन्ते *। भो नागरिकाः! पुरुषेणानेन गोविन्दो निष्कारणं ताड्यते। रामेण स्ववचांसि न स्मर्यन्ते। मगधस्य विदेहस्य च नृपौ राज्ञा पराजीयेते। कृष्णेन वपुरलङ्कारैर्भूष्यते (मण्ड्यते,प्रसाध्यते)। स्तेनाभ्यां नृपस्य कोषश्चोर्यते। आचार्यै शिष्येभ्यो धर्म्म उपदिश्यते।

---

*: Use the pl.

NOTES ON EX 12.

* दिश (अति सर्जने) to give, with the preposition सम् means to send on an errand.

With आ it means to order, to command.

With प्रति+आ it means to cast into the shade, to rival, to repudiate.

With व्यप, it means to pretend; to feign.

With उप, it means to instruct

ज्ञा with अव means to insult; to disregard.

——

EXERCISE 13.

भार्या निजपत्युरादेश मनुरुध्यते । व्याधाः (निषादाः, लुब्धकाः)श्वभिः सह मृगी रनुसन्ति । कासारे प्रमदाः स्वीय वल्लभैः सहारमन्ते । सचिवस्य प्रस्थान समयः (प्रयाण वेला) न ज्ञायते । बुधाश्चातुर्य्येण सँकटान्यवतरन्ति । अयोध्या वासिनो रामस्य निर्गमणं शोचन्ति । जनकात्मजां रामः परिणयति (समुद्वहति) । गोविन्दस्य मित्रैः कथे उक्ते । युवत्यौ ग्रीवासु माला धारयतः । अवन्त्या † अङ्गना लावण्यवत्यो वर्तन्ते । प्रासादाद्वातायनेभ्यो* नृपैः पुरो रामणीयकं दृश्यते। द्वे माले (स्रजौ,द्वौ हारौ)हस्ताभ्यां नीयेते । सेनापते रादेशान् सैनिका अनुरुध्यन्ते ।

जनानां कलेवराणि व्याधिभिः (गदैः, आमयैः) पीड्यन्ते। दृतौ भूमिमटतः॥

NOTES ON EXERCISE 13.

गाः वेदरूपा विन्दति विन्दते वेति गोविन्दः।

प्रशस्तान्यङ्गानि सन्त्यस्या इति अङ्गना।

† By Pân:—लोमादि पामादि पिच्छादिभ्यः शनेलचः, i-e to अङ्ग, न is added in the sense of possession. प्रकृष्टो मदो यासां ताः प्रमदाः।

* By Pân:—ल्यब्लोपे पञ्चमी कर्म्मण्युप संख्यानम् i–e when the sense of the Absolutive is suppressed in a sentence, the object of the absolutive is put into the ablative case, as, प्रासादात्पश्यति, प्रासादमारुह्य इत्यर्थः।

EXERCISE 14.

स्त्रियो वापीभ्यो जलमुद्धरन्ति। स्तेनाः पार्थिवस्यादेशेन रक्षकैः परिव्रियन्ते। हरेरुत्कण्ठा रामस्य वचने ऽपनीयते। वल्लभाः प्रियाभिः सहोपवने रमन्ते। सीतायाः सहचरीभिर्गीते गीयेते। कौशाम्ब्या नृपेण अवन्त्यधिपतेः सकाशं दूताः

प्रहीयन्ते (विसृज्यन्ते, प्रेष्यन्ते)। चेरा ग्रामात् (खर्वटात्) *सत्वरं प्रत्यागच्छन्ति । नास्तिकाः प्रतिमापूजनेन न तुष्यन्ति। विवाहोत्सवे (करपीडन समये) निजात्मजायै स्वर्णालङ्कारान् यच्छति पिता । प्रासादो रत्नभासा भाति (रत्नत्विषा द्योतते)। पाठशाला ग्रामाद्द्वौ क्रोशाववस्ति । प्रियाभिरनुगम्येथे । क्षमया चेतः शान्तिरुपलभ्यते । ललनाश्चेटीभ्यः कुप्यन्ति । भूमेरु-द्भवन्ति सर्वाणि सुखानि । कुमार्यो हुताशने हवींषि जुह्वति।

NOTES ON EXERCISE 14.

* Soon=सत्वरं,आशु, तूर्णं,शीघ्रं,क्षिप्रं, झटिति,ज्योक् द्राक् । प्रासादः=सौधः

हुतं अश्नाति भुंक्ते इति हुताशनः ।

N. B:–The word हविस् is neuter.

EXERCISE. 15.

जयन्त इन्द्र जायायाः पुलोमजायाः सुतोऽस्ति । ललने तरुच्छायायां निषीदतः । अवन्त्या रथ्याः † पांसुभूयिष्ठाः । कुणपाशना रजन्यां संचरन्ति । गोदावरी नीरे बहवः सारस-पक्षिणो दृश्यन्ते । स सकलेषु शास्त्रेषु सर्वासु च कलासु (कौशल्यं) नैपुण्यमधिगच्छति । नारीभिः सोत्कण्ठाभिर-खिला निशा याप्यते । अनुचरस्तेषां कुशलोदन्तमादाय

उज्जयिन्याः प्रत्यागच्छति । रामेण वहवो मत्स्या नदीकूपानां वारिणि दृश्यन्ते । सहचरीभ्यः पुष्पमाला (हारयष्टयः) नीयन्ते वल्लभैः । हे स्त्रि ! कथं त्वं कासारं न गच्छसि तत्रोदके न रमसे च ? तौ शिलायामुपविशतः । शिवोपासकाः पार्वत्या (उमायाः) मन्दिरं प्रति व्रजन्ति । हरये नद्यास्तीरे चन्द्रिकायां निषीदनं रोचते । तौ कथाभिर्विनोदयत आत्मानं वृक्षच्छायायाम् ।

NOTES ON EXERCISE 15.

† पादैः सूयन्ते, पन्नाः शरते, पंसनीया भवन्तीति वा पांसवः, इति यास्काचार्य्यः ।

इन्द्र is from root इदि (परमैश्वर्ये) to have great power, इन्दति इति इन्द्रः ॥

EXERCISE 16.

रामस्य भार्याया विनयं सुवचोभिः श्लाघामहे । चेटीनां वैयात्यं न सहे । गायिकाया गुणा महिष्याः सखीभिर्ज्ञायन्ते । पर्वतानां कन्दरासु (दरीषु) भास्वन्ति रत्नानि विद्यन्ते । * महीपालस्य प्रत्यागमनं महिष्योत्कण्ठया प्रतीक्ष्यते । क्रीडार्थं प्रियाभिः सहोपवनं प्रविशतः । एतादृशीभ्यो वाञ्छाभ्यः सर्वे आश्रयः † प्रभवन्ति । विद्यासम्पन्नो नरः सर्वत्र मान्यते, विद्याविहीनस्तु अवज्ञामाप्नोति । पञ्चवटीनाम्नि अधिष्ठाने

विविधा जीर्णाः (पराक्तनाः, यातयामाः) कन्दरा दृश्यन्ते । साधुर्बालको नित्यशः पाठशालां गच्छति,नियतकाले निवर्तते, पथि बालकैः सह न क्रीडति (खेलति, हेलति) । किं कारणं महांतः संभाराः क्रियन्ते नगर्य्याम् ? तस्यवाक् सूनृतया स्त्रीणां मनांसि आकृष्टानि । भूमौ सर्वमिदं भङ्गुरं (क्षणिकं) विद्यते ।

निजभार्याणां वचनीयाचारात् ते सुखं न लभन्ते । मातुः कैकेय्या आदेशं रामः पालयति । भो सुहृद् ! अहं प्रियया सह मन्दाकिन्या नीरं विलासार्थं प्रपद्ये ।

NOTES ON EXERCISE 16.

विभर्ति कुटुम्बं इति भार्या ।

Rude; impudent = धृष्टः, धृष्णुः, वियातः ।

† पुंस्याधिर्मानसी व्यथा इति अमरः, आधिः means mental pain and is mas.

* The root विद् belongs to the 2nd, 4rth, 6th and 7th classes with different senses. The following doggrel gives all these:—

सत्तायां विद्यते ज्ञाने वेत्ति विन्ते विचारणे । विन्दते विन्दति प्राप्तौ श्यन् लुक्श्नम् शे ष्विदं क्रमात् ॥

N. B:—प्रणतौ विनयमाहुः, शित्तायां विनयो मतः- i-e विनय when it means humility or salutation it is used in the neuter; when it means breeding it is used in the mas.

विनयं प्रणतौ प्राहुः

EXERCISE 17.

अहं स्तेनं लगुडेन स्कन्धे आहनम् । ह्यो निजप्रोठान्-शिक्षथाः । स स्वपराक्रमेणाखिलं नगरमजयत् । वाराण † सीये पथि बहून् यात्रिकान् राम ऐक्षत । कदा त्वं न्यायाध्य-यनमारभथाः ? आवां गोविन्दं अभिधानवासस्थानेऽपृच्छाव । स हस्ताभ्यां भूमिमस्पृशत् । मार्जारो गृहे मूषकानादत् । स वयस्याभ्यां सह भूतलेन्यषीदत् । वयं जनकस्याज्ञानुसारेण गृहे रूप्यकानगणयाम । स युष्माकं (यौष्माकीनं) कथा मिथ्यात्वं जगति पर्य्यघोषयत् । स्तेनौ राजकोषं रात्रावाश-हरताम् । तृषार्तो (तृषितः) यात्रिको नद्या आविलं सलिल-मपीयत * । आवां धान्यराशीन् भूतलेऽक्षिपाव । स सर्वं भारं स्कन्धे उदवहत । तडागस्योदकं ग्रीष्मोष्मणाशुष्यत् ॥

NOTES ON EXERCISE 17.

† By Pân:—तद्गच्छति पथिदूतयोरित्यणादयः, वृ-द्धाच्छः, i-e the place to which a way leads, takes the अणादि Suffixes वाराणसी+छ (ईय) Earth:—गौः, भूः, मही, पृथिवी, पृथ्वी, मेदिनी, अवनिः, क्षितिः, क्षमा ।

* N. B:—अपीयत is Imp. from पी, 4rth Conj. Atm.

EXERCISE 18.

ईश्वरः सर्वान्नरानसृजत् । परमात्मा नरेभ्यो लोचने कर्णौ, हस्तौ पादौ चायच्छत् । स सीताया उत्कण्ठां सांत्व-वचनेरपनयत् । सचिवेन राजकुमारोऽभिषेकेका सिक्तः । अह-मयोध्यामार्गं यात्रिकाय अदर्शयम् । नृपाः प्रजा अपीडयन् । तेऽपि कृतव्यलीकत्वात् ताड्यन्ते । मित्रस्य साहाय्येन भूतले पुस्तकान्यरचयः । तस्मै गोविन्दस्योपदेशो नारोचत । शिशु-राम्राभ्यामस्पृहयत । आम्रौ च दत्तौ । पुत्रौ जराभिभूततातं सुचरितैः प्रासादयताम् । अहं नृपस्य गुणान् सदसि प्रास्तवम् । द्वे पुष्पे वृक्षशाखाया अपतताम् । स वणिक् सन्मुखे धान्यं तुलायामतोलयत । रामः पञ्चवट्यां गोदावरीसंनिधाने सीतया सह न्यवसत् । अहं ह्यो न्याय नियमानबोधम् । किन्तु साम्प्रतं विस्मरामि । गतदिने (अतीतेऽहनि) युवां ग्रामात्स-हसा निरगच्छतम् ।

NOTES ON EXERCISE 18.

मित्र is used as neuter, except in the Veda, where it means Sun or God. It is derived:–

मेद्यति इति मित्रम् ।

† Child=पोतः, पाकः, अर्भकः, डिम्भः, पृथुकः, शावकः, शिशुः । न पतति पितानेन इति पुत्रः, or पुं नरकात् त्रायते इति पुत्रः ।

EXERCISE 19.

Use pl.

भूभृन्मगधस्य राज्यायायतत, परं नालभत। सीतां लक्ष्मणो वाल्मीकेरुटजसंनिधौ काननेऽत्यजत्। शत्रवः सकलं नगरमदहन्, पुनश्च पलायन्त। वयं भोजनमपचाम सहर्षं मिथोऽभक्षयाम। अहं कृष्णमाह्वयम तस्प्रति सर्वं वृत्तान्त-मशंसम्। वृषभौ नद्यास्तीरात् जलमचरताम्। गोविन्दस्य प्रतिभाषणेन नाहं प्रासीदम्। शकुन्तला पितृगृहत्यागसमये सकरुणमक्रन्दत् (अरोदीत्)। राज्ञीं सहचर्य्योऽन्वकुर्वन्। तैर्ग्रन्थ रचनेन प्रभूतं वित्तमासाद्यत। रामो दण्डक वने बहूनि रक्षांसि अहिनत् †। पवनवेगात् वृक्षशाखा अकम्पन्त। स सर्वाः कला गुरोरशिक्षत। रमा वल्लभैः सह रमणार्थं ज्योत्स्ना-यामगच्छन्। ते तथ्यमभाषन्त। कथं त्वं निरापराधिनस्ताडय-सि? यमुनायाः सख्यादुष्कृतमक्रियत।

वात

NOTES ON EXERCISE 19.

† अहिनत् is Past Imperfect from हिंस् to kill, 7th conj. N. B:–राक्षस is mas; but रक्षस् is neuter.

To Speak; to tell:–वच्, गद, वद, भण, कथ, ब्रू, वच्। शातयतीति शत्रुः। one who tears down another.

* शकुन्तैः पक्षिभिर्लाता इति शकुन्तला।

EXERCISE 20.

गुहो नावः साहाय्येन † भागीरथी मवतरत् । वनेऽहन् व्याधो हरिणम् । तस्य शरीरं विविधैरलङ्कारैरलंक्रियत । बालकाः पथि मिथोऽक्रीडन्, अध्यापकेन ताडिताश्च । कथं पुनश्चरो (चारणः, दूतः) नगरं प्राहीयत । आवां मित्राभ्युदयेऽमोदावहि । शिष्या गुरून् सादरमभ्यवादयन्त । वयं चौरानपश्याम परं तैर्वयं नादृश्यामहि । कथं स उपालम्भं त्वमया नासहत ? गोपालस्य मित्राणि त्वामस्मरन् । नृपः स्वकीयात्मजायाः परिणयनविधानसमये भूरिदक्षिणामयच्छत् । तस्याज्जटायाः पुष्पाणि अस्रंसन्त । ते शत्रुभिः सहायुध्यन्त किन्तु ‡ सातौ पराजयमलभन्त । अहं नृपात्केवलं प्रसादमपैक्षि, त्वन्तु धनमैक्षः । तस्य सर्वे आतंकाः (आमयाः) मित्रोपदेशनाशेनीयन्त । शठस्त्वां विमार्गेणानयत् । किं त्वं रामं ग्रामान्निर्गमनाय अकथयः ?

———

NOTES ON EXERCISE 20.

† The Ganges= गङ्गा, जाह्नवी, मन्दाकिनी, सुरसरित् । जङ्गम्यते इति गङ्गा; जन्होरपत्यं स्त्री; मन्दं मन्दं अकितुं गन्तुं शीलमस्या अस्तीति मन्दाकिनी; । शीर्यते इति शरीरम्–that which wears away. गृणाति इति गुरुः, who instructs by moral lessons.

* वनं also means water; as, सवनं वनम् ।

π By Pân:—एतिस्तुशास्वृदृजुषः क्यप्, to root शास् which becomes शिष्, क्यप् (य) is added.

‡ By Pân:—स्त्रियां क्तिन्, the Suffix is added to the root सो, to finish. which becomes सा. Hence सातिः।

EXERCISE 21.

पुष्पस्य सौरभं मधुरमस्ति। कथञ्चेदमवचीयते ? स भ्रातृभिः सह पैतृकरिक्थभागार्थं कलहमकार्षीत् (अचकलहत्) आत्मजायाः पतिर्जामाता इत्युच्यते (इति प्रचक्षते)। आहवकाले सारथिः निजासनात्पपात। अश्रूणि प्रमदायाः कपोलाभ्यां प्रावहन्। सा दुराचारत्वात् भर्त्रा प्रत्यादिष्टा (निराकृता)। हरिः पुस्तकमरचयत (प्राणैष्ट, प्राणैषीत्) किंत्विदं सर्वेषूपहास्यतां गतम्। रघोर्जनकस्य सद्म निपुणैः शिल्पिभिर्निरमायि। त्वं राजबाहुभ्यां रक्षितोऽसि। कथं त्वं स्वीयनिन्दकेभ्यो † बिभेषि ? अनुचरेणाधिपतेर्धनं कैतवेनापह्रियते। अर्जुनः शत्रूणामुपरि शरान् प्राक्षिपत्। मूषकः शम्भूसूनोर्गणपतेर्वाहनमस्ति। सैनिकाः सेनापतेर्बहूनि पारितोषिकाण्यविन्दन्त। वयं युद्धेऽरीन् इषुभिरजयाम।

NOTES ON EXERCISE 21.

Charioteer=सारथिः, यन्ता, क्षत्ता, सव्येष्टा।

† By Pán:—भीत्रार्थानां भयहेतुः, the object of fear is put in the Ablative case.

N. B:—According to the लिंगानुशासन of Pânini the word पुस्तक is also mas; but it is rarely used in this gender.

EXERCISE 22.

अयोध्यायाः स्वामिनं प्रति न्यवर्ततां दूतौ। सगरो यज्ञमकरोत् † वाजि निरुच्य व्यसृजत्। एताहग्भिर्वचनैर्मम तनयो धैर्य्येण वियुज्यते। बालको मातुलाज्ञां नान्वरुध्यत। * भिक्षाकौ दातारं धनमयाचेताम्। किन्तु तौ भिक्षू तेनावधीरितौ। खलेभ्यः साधूनामभ्युदयो नोरोचते। वयं स्रष्टारं वन्दामहे तस्य गरिमाणञ्च प्रथयामः। मृत्योर्भयं धीरा न गणयन्ति। काञ्च्यधिष्ठाने भूरिद्रव्येश एको वणिग्जनोऽध्यवात्सीत्। तस्य व्याख्यानं श्रोतृभिरवहितमनोभिर्नाश्रूयत। तेऽधिपते राेदेशान्त्यक्राम्यन्। किन्तु सानुकम्पं (सदयं, सकृपं, सानुक्रोशं) क्षमिताः। वातः सर्वांस्तरून् उद्यानेऽभंक्त। नृपस्य जामातुर्भृत्या राज्ञीं स्यन्दने निन्युः। स मातुर्वाक्यानि श्रुत्वामुह्यत्। जराभिभूता (वार्धक्यं गताः, स्थविराः, प्रवयसः, पश्चिमे वयसि वर्तमानाः) पुत्र पौत्र प्रपौत्रैरवज्ञायन्ते॥

NOTES ON EXERCISE 22.

Sacrifice=यज्ञः, यागः, इष्टिः, इज्या, क्रतुः, मखः, मन्युः, सवः, अध्वरः।

† वाजिन् is from वाज् or जस्, food. इन् is added in the sense तदस्त्यस्य इति।

* By Pân:—जल्पभित्तकुट्टलुण्ट वृङः षाकन्, to root भित्त tha प्रत्यय, षाकन् (आक) is added.

भिक्षुः, is formed by Pân:–सनाशंसभित्त उः. to root भिक्ष the Suffix उ is added in the sense of the doer.

साध्नोति परकार्य्याणि यः स साधुः। The root क्रम is optionally declined in the 4rth conj.

N. B:—Any root ending–in ऌ has अ for its termination in the Aorist. Thus we get अगमत् from गम्ऌ, and अमुचत् from मुच्ऌ।

———

EXERCISE 23.

गोविन्दाय स्वसुः पौत्रैः सह संलापो रोचते। मम भ्रातुर्जामाता धनिकोऽस्ति। मम आवुत्तस्यात्मजाया मातुलो न्याय परायणः। त्वं कदा मे भ्रातुर्जामातुर्गृहमपश्यः? तेन तस्यामेव रात्रौ मम भ्रातुर्वेश्मनि कार्यं समापितम्। ते मातृष्वसेयेभ्यो भूरिवित्तमयच्छन्। सर्वेषां भ्रातृणां हरिर्वरिष्ठः। रामो बाहुबलेन भुवनत्रयं व्यजयत्। कथं त्वं सारथेः शीर्षे † इषून् प्राक्षिपः? माता निजात्मजाया हस्तौ उष्णोदकेन प्रक्षा-

लयत्। शुकाः स्वामिन उद्याने शाखासूपविष्टाः। दाशरथिर्मिथिलानरेशजनकस्यात्मजां समुदवाक्षीत्। रामस्य भ्रातुः पुस्तकानि कृमिभिर्भक्षितानि। परशुरामस्य परशुर्बहूनां क्षत्रियाणां शिरांसि अलुपत्।

स्य

NOTES ON EXERCISE 23.

दशरथस्यापत्यं पुमान् दाशरथिः, रामः।

† Arrow:—शरः, इषुः, वाणः, मार्गणः, नाराचः, आशुगः, सायकः, शिलीमुखः, विशिखः।

N. B:—अलुपत् is Aorist from लुम्प to lop off.

EXERCISE 24.

मि

गेहे रामस्यास्ति एको गुरुः खड्गः। मातृकानां स्वसॄणां सन्ति मनोहारिण्यः सुताः। प्रस्थानसमये तव नासीत्किञ्चिद्धनम्। वहवस्तरवः †पुष्पफलविवर्जिताः। हरेर्मातुरेका कन्या द्वौ च पुत्रौ सन्ति। कण्वस्यासीत् शकुन्तलाख्यात्मजा। गणपते रासीद्गजाननम्। अतएवासौ गजवदन इत्यभिधीयते। प्रालेयाद्रेर्णां सन्त्युदग्राणि सानूनि। वकुलपुष्पस्यास्ति मधुरो गन्धः॥

NOTES ON EXERCISE 24.

मामकाः = मामकीनाः = मदीयाः मम = मे ।

* प्रालेयं = Snow = अवश्यायः, नीहारः, तुषारः, तुहिनं, हिमम् ।

† N. B:—प्रसव is one word for fruition and foliage.

EXERCISE 25.

आचार्यो राजकुमाराय नीतिमुपदिशति (नयमनुगृणाति)। देवदत्तेन पुरुषस्य ज्ञातिर्न परिज्ञायते । स धैर्य्येण सर्वान् रिपून् पराजयत । भ्रातरः प्रत्येकस्मिन् सातिशयं स्निह्यन्ति । ते बुधानां गुणान् स्वकीय बुद्धिगौरवात (प्रतिभाप्रकर्षात्) प्रशंसन्ति । संपदि मानवो मित्रैः परिव्रियते । कृषीवलाः प्रकृत्या व्यवसायशीलाः सन्ति । इह जगति सुचरितैः पुरुषा विख्यातिमधिगच्छन्ति । स्मृतिषु नीतिविषये बहवो नियमा लिखिताः । किं तुभ्यं स्वर्गपुरीयपौराणां † वृत्ती रोचते ? अहं जगत्कर्तुर्गुणान् वर्णयामि । ते निजवासस्थानानि चित्रैर-भूषयन् । भ्रातरौ मिलित्वा सप्रेमं * बहून् दिवसान् न्यवसताम्। विपन्नानां परित्राणेन मानुषाः कीर्तिं लभन्ते। वामा पत्युः स्वसुः कोपं शांत्या नासहत ।

NOTES ON EXERCISE 25.

* By Pàn:—कालाध्वनोरत्यन्त संयोगे, any time passed and any distance travelled are put in the Accusative if the continuance has not been in any-wise interfered with.

वामा = वमति स्नेहं इतिवामा ।

† N. B:—वृत्ती is not here dual; but on account of the dropping of the next र, the preceding ending vowel has been lengthened, by Pàn: ढ्रलोपे पूर्वस्य दीर्घोऽणः ।

EXERCISE 26.

बुधेभ्यः प्रतिमापूजनं नोरोचते। अहं नद्यन्तिकं क्षेत्र वह्वीर्गा अद्राक्षम। श्वश्रू वध्वे प्रतीपाचरणात् कुप्यति। सुधियां प्रज्ञा विपत्सुनैव स्खलति। वयं शिलापट्टेषूपविशामः स्रष्टुः सामर्थ्यं ज्योत्स्नायां प्रस्तुमः। कवेर्मानसी सृष्टिः काव्य—मित्युच्यते। खलस्य नैकस्मि सद्भिः सदैव हीयते। योधः शत्रोरावसथं *प्राविक्षत्। धनञ्चापाहार्षीत्। मानुषा गोः पयः आप्नुवंति, कथं तर्हितां ताडयन्ति ? कृष्णास्तव स्वसुः

श्वश्र्वा गृहं प्रथमदर्शयत्। पुरुषाः क्लेशप्राप्तये उत्पद्यन्ते ननु सुखोपभोगायेति। स आत्मश्लाघावचनैः कीर्तिमलभिष्ट। हरिः श्वश्र्वै पुष्पोपहारमयच्छत्॥

NOTES ON EXERCISE 26.

† In the Feminine Gender, both बहुः and बह्वी are used, By Pān: बह्वादिभ्यश्च।

* प्राविक्षत् is Aorist from विश to enter, with प्र.

EXERCISE 27.

हरी रामं नापीडयत्, हरिं मा ताडय। अयि नृपाः! प्रथमतस्तु स्वाभिधानानि कीर्तयत! वत्स! सर्वदा पितरावनुरुध्यस्व। आचार्यमप्यभिवन्दस्व। अध्यापकं प्रति कथय निजपितुर्नाम स्वीयञ्च। वयमत्रोपविष्टाः। किं त्वं वेदिकायां निषीदसि? गच्छेम अन्विच्छेम च सुहृदं यज्ञमित्रम्। लोका वित्तमधिगच्छन्तु सुखिनो भवन्तु वा। रे रे पान्थाः कासारस्य सलिलं स्वादध्वम्। बालक आज्ञाभंगात् ताडितः। †मा तथा तथाः (मैवं समाचर)। कन्ये! शिशवे फलं यच्छ। अध्यापकस्य वशगो भव, पाठांश्च सम्यक्तयास्मर। पाचक!

(सूद, सूपकार,) ओदनमानय, अहं क्षुधाविष्टोऽस्मि । गच्छेम मिलित्वा निमन्त्रयामहै सुहृदं भोजनाय (परिवेषणाय)। मा गच्छतु वृषभो वापीम् । त्वं सर्वदा जनानां सुकृतानि श्लाघस्व तेषां दुष्कृतानि च संवृणु (आच्छादय) अवतु परमेश्वरः सर्वान् जनाननिष्टेभ्य इति ॥

NOTES ON EXERCISE 27.

† one तथा is Indeclinable; the other with Visargas is Aorist from तनु to spread, which secondarily comes to mean to do.

EXERCISE 28.

मातर्यनुरज्यस्व यावज्जीवञ्च तां मानय । ताड्यन्तु ते वैयात्याद्धतोः । कुमार्गेण (* पापेनपथा, दुष्टवर्त्मना) मा गमः । † परित्यजाभिमानम् । बुधान् सेवस्व । पायाद् हरः सकलान् सदस्यान् (पारिषद्यान्) । + रविरस्तंगतः । संप्रति निवर्ततामहैगृहम् । जानीहि तावत्पुरुषस्याभिधां तदनन्तरं तं गृहे प्रवेशय । निष्कामयन्तु चौरं ग्रामात् कृतापराधम् । प्रत्याह्वय सेनापतिं अयोध्यायाः । × भुञ्जन्तु नृपा लोकान् न्यायानुलोम्येन। मामोदिष्ठा जनानाम् भद्रे । भ्रियतां जलेना-

मुखं घटः। भयावहात् पापाद्धेतोः पात्यायाहं निरये। यन्न दत्तं मूर्ख मागणय (मा मंस्थाः) योधाः शत्रुभिः सह युध्यन्तां, तान् पराजयन्ताञ्च। इममुदन्तमाकर्ण्य विस्मयान्वितो ऽस्मि। पुनरप्ययमुच्यताम्।

NOTES ON EXERCISE 28.

† It is equivalent to परिहराहोपुरुषिकाम्, अहङ्कृतिं जहीहि। * पाप here means sinful, to give it an adjectival sense, अच् (अ) is added, by Pan: अर्शादिभ्योऽच्। as, पाप नापितः, दुष्ट इत्यर्थः। + It is equivalent to अस्तमितोऽर्कः, अस्तमनवेलेयं समागता, सहस्रांशुमाली अस्ताचलं प्राप्तः। अर्च्यतेऽसौ इति अर्कः।

× By Pân: भुजोऽनवने, भुज् 7th conj, is Pras. when it means to protect; but it is Atmanapad when it means to eat. N. B.—पात्यायाहं=पात्यै+अहं। पात्यै is the causal in the Passive of पत in the 1st. P. S. Imperative mood.

EXERCISE 29.

माता पुत्रमवोचत् "निषद्यां गच्छ आम्रान् चा नय"। रविरति तीक्ष्णो भवति, अतः सत्वरं मा धाव (धावस्व)। तेनान्नं पाचितं, तस्मात् साम्प्रतमिदमदाम। सदैव सत्यंब्रूहि। मा प्राणिनः प्रतारय। त्वं गृहं गन्तुं राज्ञानुज्ञातः। तावद्विमर्शनीयाः सर्वउपायास्तदनन्तरं अनुष्ठीयन्ताम्। आदिश्यतां दासी आरामात्कुसुमान्यानेतुम्। वृषभौ मुच्येतां, महीमटताञ्चेति। सोऽनुभवतु निजकर्म्मणां विपाकम्। द्वे फले महिष्याःकृते तरोरानीयेताम्। † लोकानां शिवाययतस्व नतु स्वार्थाय। मत्स्य शरीरं खण्डशः छिद्यतां, अभ्यन्तरे रत्नंसंभाव्यते। स वेदमयीं चतुष्टयीमध्यगीष्ट (स वेदपारगः) एतादृशं विपश्चितमभ्यर्च्य मानय च॥

NOTES ON EXERCISE 29.

† लोकस्तु भुवने जने इत्यमरः *i-e* लोक means both world and the people.

दासते ददाति आत्मानं इति दासः। शिवं=भद्रं=कल्याणम्।

EXERCISE 30.

गोविन्दः केवलं दैवेन रक्षितो न कश्चिदप्युद्योगः कृतो मानवेन। स लक्ष्मणं निक्षेपनिर्यातनाय व्यजिज्ञपत्। वृषभः

(महोत्तः) सरयुनद्यास्तीरे जलं पातुं गतः। सीतां कान्तारे विहाय लक्ष्मणोऽयोध्यांन्यवर्तत। † त्वयका काशीं गत्वापि विश्वेश्वरायतनं न दृष्टम्। पान्थोवृत्र्मनि बहुकायेन (पीवरतनुना) * सर्पेण दष्टः। वालकं गृहे नीत्वा रामोऽगात्। अर्जुनेन सह युध्यमानः प्रमिलः पराजितः। ग्रामोरिपुभिः परिवृतोऽग्नौ प्रवेशितश्च। परशुरामो निजभ्रातरःउपगम्य सर्ववृत्तान्तम् चेकथत्। दारुणं समाचारं निशम्य सा मुमोह। विपद्द्वेषु निन्दकेषु च क्षमाकरणीयेति शिक्षस्व। ऐहिक दुःखनिकरमनुभूय कथं त्वं पुनरुद्भवाय स्पृहयसि? दास्यौ भया कंपिते शब्दमेकमपि नाब्रूताम्। कार्यं सम्पादयितुं प्रतिज्ञायापि कथं तेनेदं नानुष्ठितम्।

NOTES ON EXERCISE 30.

मनोरपत्यं पुमान् इति मानवः, By Pân:, तस्यापत्यम्

† By Pân: 'अव्यय सर्वनाम्नामकच्प्राक्टेः' *i-e* optionally the pronouns and the Indeclinables take the augment अकच् (अक्) befor the terminating consonant and a vowel, as उच्चकैः।

* Serpent=सर्पः, अहिः, भुजङ्गः, भुजङ्गमः, भोगी, तक्षकः, आशीविषः, विलेशयः नागः, उरगः।

+ It is equivalent to भीतिवेल्लिताङ्गयष्टी दास्यौ, and साध्वसतरलावयवे चेट्यौ ।

EXERCISE 31.

इत्थं ब्राह्मणैः संबोधितैरस्माभिः कार्य्यं समारब्धम् । एवं प्रोच्य स आसीनतामगमत् । रामेणाजौ बहवः शत्रवो हताः । उपवने चिरं विहृत्यावां गृहं प्रत्यागाव । स शिवं† नमस्कृत्य गृहं गतः । रामं साधिक्षं प्रताड्य स निकेतनं प्रापादि । प्रशंसितेन नृपेण कवये प्रभूतं धनं प्रदत्तं (वितीर्णम्) । ते पङ्के (कर्दमे) निमग्नाः, तानुद्धर्तुं कश्चिदुपायश्चिन्त्यताम् । विरूपा कन्या खञ्जेन नरेण समुद्वाहिता । यमुना निजतनयस्य गुणान् स्मृत्वा रोदितुं प्रावर्तत । अरण्ये पराजितो योध आसादितः कारागृहञ्चानीतः । रामः पित्रादिष्टः पिनाकपाणेः कार्मुकं विभज्य (भङ्क्त्वा) लोकग्रहणार्थं प्रतस्थे ।

NOTES ON EXERCISE. 31.

कौति इति कविः, from कु शब्दे ।

† By Pān: उपपदविभक्तेः कारकविभक्तिर्बलीयसी, नमः, when used with कृ becomes the principal verb and therefore governs the Accusative instead of the Dative.

N. B:—तॄ to cross, with वि means to give.

EXERCISE 32.

द्वौ पुरुषौ गोपालेन सह युध्यमानौ हरिणावलोकितौ। पाठान् * स्मारं स्मारं स श्रान्तो बभूव। भृत्याः स्वामिनं सेवमाना बहूनि पारितोषकाणि लभन्ते। † मरणोन्मुखा सा गतवृत्तान्तमाचष्ट। हरिगोपालौ लोकश्रेयसे यतमानौ न विश्रान्तिमापताम् +। अहं भ्रातुः श्वश्र्वा आगमनं प्रतीक्षमाणोऽस्थाम्। अध्यमानो ग्रन्थो देवदत्तेन पठितः। × रोदनेन नेत्रयो रक्तिमानमवाप ललना। तं प्रस्थाप्य शीघ्रं गृहमागच्छ। मा बहिर्गच्छ। सैनिकानाहूय संभारांश्च विग्रहाय आरभस्व। † दशरथोऽयोध्यां प्रति निवर्तमानो बहूनि हृद्यान्युद्यानानि नेत्रपात्री चकार। ऋषय एवेश्वरं ध्यायमानाः शाश्वतमानन्दं लभन्ते। द्वे स्त्रियौ हरिदत्तेन संलपन्त्यौ पथि दृष्टे। युवां गोविन्देन स्पर्धमानौ कृतकृत्यौ भूयास्तम्।

NOTES ON EXERCISE 32.

* By Pân:—आभीक्ष्ण्ये णमुल्, *i-e* when frequency of action is meant, the Namulant form is used: to a root, अम् is added and वृद्धि takes place.

† दशसु दिक्षु रथो रथगतिर्यस्य इति दशरथः।

‡ It is also equivalent to कालालीढा, मृतप्राया।

+ It is an Aorist from root अप to obtain, 5th conj.

× It is also equivalent to सा रोदनेनारुणिताक्षी समजनि।

EXERCISE 33.

स यज्ञदत्तगृहवासी इति किं त्वयेदं न ज्ञायते। सर्वे जन्तवः सर्वशक्तिमता परमात्मनोत्पाद्यन्ते। यतयः परमात्मनो गौरवं (ईशानस्य महिमानं) ध्यानेन जानन्ति। तव भ्रातुः सूनवो निरामयाः सन्ति। बहवो ग्रन्था मेधाविना रामेण प्रणीयन्ते। वेधसा अश्मानो जन्तवः परवताश्चोत्पादिताः। तीर्थानि गच्छन्तो यात्रिकास्ताभ्यां वर्त्मनि दृष्टाः। दण्डधेरऽपराधिनो गुणिनश्च पारितोषकाणि प्राप्नुयुः। भृत्याः स्वामिनमनुरुध्यध्वम् भक्त्या सेवध्वञ्च। ऊर्ध्वमवलोक्य मयाम्बरात्पतन्तोऽश्मानो दृष्टाः। एवमभिधाय राज्ञी कंचुकैः सहावरोधान्निर्जगाम। वयं फलाशिनो नोऽभवाम, फलाभ्यवहारेण क्षुधा न निवर्तते। वर्त्मना गच्छन्त्या नार्या क्षेत्रे गाव आसीना निरीक्षिताः। हस्ते पत्रमादाय स राजद्रोहिणां नामान्यपाठीत्।

NOTES ON EXERCISE 33.

† Sky=व्योम, आकाशः, नभस्, विहायस्, वियत् अम्बरं, गगनं, द्यौः ।

N. B:—अपाठीत् is Aorist from पठ् ।

EXERCISE 34.

किं त्वं गोपालस्य सूनूनां वयांसि † जानासि ? वुधा+नन्तरेण कश्चनापि पुरुषोऽनिष्टानां विषयेऽनागतविधाता नास्ति । कनीयान् भ्राता ज्यायसा भ्रात्रा सहायुध्यत । ऋत्विक् इद्धे हिरण्यरेतसि * प्रक्षिपति बलीन् । देवाभूपतये बहून् वरान् वितरन्तु (दिशन्तु) । शत्रुणा वक्षसि प्रहृतः स तूर्णं निधनं × ययौ । यतयस्तपश्चर्य्यां कुर्वन्तः (तपांसि तपन्तः) सरयुनद्यास्तीरे नृपेणावलोकिताः । ऋत्विजा यज्ञे समारब्धे, अहं गृहमागाम् । रामो बहुभिर्निशाचरैः सह दण्डकवनेऽयुध्यत । हरेः कनीयांसो भ्रातरः सूनूनां वाक्यैः संतोषिताः । अधीतिभ्यो ब्राह्मणेभ्यः केवलं दक्षिणां देहि । शर्वरीशो दिनेशश्च प्रत्यहमुदेतोऽस्तञ्च यातः।विहायसो बहवः प्रचण्डोपलाः पतिताः। वयं निशाया अतिसान्द्रे तमसि वहिर्गन्तुमसमर्थाः (नालं, न क्षमाः) ।

NOTES ON EXERCISE 34.

† अजति इति वयः, By Pân: अजेर्व्यघञपोः, *i-e* the root अज् takes the substitute वि when followed by affixes other than अप् and घञ्।

+ By Pân:—अन्तरान्तरेणयुक्ते, *i-e* अन्तरा and अन्तरेण govern the Accusative.

* अग्निः=fire=वह्निः, अनलः, पावकः, हुतभुक्, वैश्वानरः, जातवेदाः, कृशानुः, तनूनपात्, हुताशनः, हिरण्यरेताः, आश्रयाशः, धूमकेतुः।

× It is also equivalent to यमसदनमवाप; जीवितमुत्ससर्ज; प्राणान् मुमोच; यमसदनाध्वनि अध्वनीनो बभूव; स्मर्तव्यशेषमयात; कथावशेषतां प्राप; श्रुतिसाफल्यमापत्। The Synonyms of निशा are the following:—रात्रिः, नक्तं, निशा, निश्, दोषा, रजनी, शर्वरी, विभावरी, क्षपा, क्षणदा, त्रियामा।

EXERCISE 35.

त्रिपुरारिणा तृतीयदृग्भासा * मदनो दग्धः। रामस्य ज्येष्ठभ्राता पूज्यपादाद्यतेर्न्यायमशिक्षत। नृपाणां नामानि सुनन्देनेन्दुमत्यैकथितानि। भो वत्स! सस्नेहं सेवस्वपितरौ

जरायाम् (जरसि)† । बहवो भ्रष्टाः पथि स्थिता मया दृष्टाः । प्रदोषकाले (निशामुखे) गगनं तमसाच्छादितं वर्तते । द्वारिकां प्रपेदे नारायणस्य स्नुषा । द्वे वाससी (परिधाने) बालकस्य कलेवरेऽग्निना दग्धे । वियति रात्रौ द्योतमाना स्तारकाः परमात्मना निर्मिताः । भो नराः ! उदयमानं + शशिनं प्रणमत । अहं कनीयसां भ्रातॄणां काशीं प्रति प्रस्थानमन्वमन्ये । कनीयस्याः स्वसुर्मनोरमया वाचा गोविन्दस्य चित्तं प्रसत्तिमयिष्ट । प्रियतमानि मित्राणि मा विस्मर । राक्षसेन वनौकसामृषीणामुटजानि नाशितानि ।

NOTES ON EXERCISE 35.

~~माद्यतेऽनेनेति~~ मद्यतीति मदनः । Some of the chief Synonyms of मदनः=cupid, are the following:—

* कंदर्पः, मकरकेतुः, मन्मथः, अनङ्गः, प्रद्युम्नः, कुसुमचापः,पुष्पधन्वा,पुष्पेषुः मनोभवः,मनसिजः, मनसिशयः । न्यायः=आन्विक्षिकी ।

† By Pân:—जराया जरसन्यतरस्यां, जरा optionally becomes जरस् before terminations beginning with vowels. Body=तनुः, तनूः, कलेवरं, शरीरं, विग्रहः ।

+ Moon=चन्द्रः=इन्दुः, सोमः, चन्द्रमाः, सुधांशुः, हिमांशुः, द्विजराजः, जैवातृकः, शशलाञ्छनः, ओषधीशः, अवश्यायकरः, रजनीकरः ।

EXERCISE 36.

तावध्ययनाय काश्यांन्यवात्ताम् । सर्वाणि वस्तूनि ईश्वरस्य करेण सृष्टानि । एतस्य भूपस्य भृत्या अनुरोधिनः । ते ये कुलीना (अभिजाताः) मृषा संभाषणं नाभिनन्दन्ति । कस्येमानि गृहाणि यानि वयं पश्यामः । दास्यो राज्ञ्योद्यानं गमनायादिष्टाः । त्वमीभ्यः खलेभ्यः किमपेक्षसे ? इमाः सर्वा गाथा महाभारते वर्णिताः । अयमसावेव द्रुमोयत्राहं सुहृद्भिः समेतोह्यः स्थितवान् । ये सलक्ष्मीकास्तान् सर्व आद्रियन्ते । इमे भृत्या ग्रामेभ्योन्यवर्तन्त । एषां फलानां कतमदेभ्यो बालकेभ्यो रोचते ? योऽत्रोत्सिच्यते तस्मा†ज्जुगुप्सन्ते सुधियः । ते गृहाः येषु ऋषय ऊषुरुन्मूल्यन्ते । असौ बालको गोविन्दं डिम्भैः सहक्रीडन्त मातुलोके ।

NOTES ON EXERCISE. 36.

द्रवः शाखा विद्यन्तेऽस्येति द्रुमः ।

† By Vâr:—जुगुप्साविरामप्रमादार्थानामुपसंख्यानम्, *i-e* words denoting abhorrence, cessation

refraining, and swerving govern the Ablative

N B:—गृह when used in the plural can be used in the masculine gender.

EXERCISE 37.

शिष्यमिमं न्यायशास्त्रसमयान् पाठयतम् । कस्मादागतोऽसि ? यद्वयमादिशामस्तदेव त्वं कुर्याः । तेऽस्मभ्यं मनोरञ्जकान् वृत्तान्नाचक्षत । जगद्रक्षको विष्णुर्नः सर्वान् क्लेशात् अव्यात् । स्तेनेनश्वा मत्तोऽपहृतः । स्मरसि अस्माकं सर्वेषां नामानि ? त्वं प्रगल्भसे । किं त्वमसहायमिमां विपदमवतरीतुं शक्तः ? असावेवायं नरोयु आवाभ्यां पथि दृष्टः । प्रचण्डाग्नौ बलीन् प्रक्षिप । मामकीना ये किंकरा उद्याने सन्ति मया ते पुष्पेभ्य † आदिष्टाः । त्वमस्माकं मध्ये सुचिरं वत्स्यसि किमिदं विस्मरसि* ? आवां वाटिकायां दीर्घमनेहसं सुहृद्भिः सहारमावहि । कोऽसौ पुरुषो योऽस्मत्सकाशमित्थं त्वरते ? अहमेभ्यो गृहीतं पुस्तकं सर्वेभ्यो मित्रेभ्योऽदर्शयम् । युवां ममदुःखान्यनुभूय निःशेषमानन्द भाजौ भूयास्तम् ।

NOTES ON EXERCISE. 37.

† By Pân:—क्रियार्थोपपदस्य च कर्म्मणि स्थानिनः *i-e* when the sense of an infinitive of purpose

is suppressed in a sentence, the object of this infinitive is put in the Dative; as, फलेभ्यो याति, फलान्यानेतुमित्यर्थः ।

* By Pân: -- अभिज्ञावचने लृट्. *i-e* with roots meaning to remember, the second future is used in the sense of the Imperfect.

EXERCISE 38.

अहं तान् तत्तीर्थमुपतिष्ठमानं वर्त्माप्राक्षम् । अस्मिन् विजने स्थाने त्वं किं लप्स्यसे ? नगरान्तरं याहि । बहवो व्याघ्राः पर्वतानां शिखरेभ्य आयान्तो मयावलोकिताः । यदा त्वं मम गृहमगच्छस्तदाहं रामेण भाषमाणः कोष्ठे स्थितः । किं त्वमधुना स्मरसि यत्किञ्चिदस्माभिस्तदवसरे कथितम् । को युष्मान् लोकान्तराणि चासृजत् । स्मरन्तु युवानोऽस्यर्षेरुपदेशम । वत्स ! प्रसादितोऽस्मि तव भक्त्या, यदभिलषसि तत्कथय (वरं वृणीष्व) । ज्ञायते भवता कस्येमौ बालकौ ? पृतनापतौ विग्रहे विदेहे सति उपकार्यां न्यवर्तन्त तस्यानुगाः । कथं त्वमेभ्योऽनुचरेभ्यो कुप्यः ? यदा ते तवाहूतयेऽगच्छन् । एषु बालकेषु (माणवकेषु) परशुरामः श्रेष्ठः, तस्मै देहि पारितोषिकम् । गृध्रेन्द्रो रामस्य

किं कारणं

स्वामिनः कृते प्राणान् मुमोच। त्वया पुरोधोभ्यो भिक्षुकेभ्यश्च प्रचुरं द्रविणमदायि। धनलोलुपत्वात् जगत्यामस्यां जायन्ते सर्वाणि दुःखानि॥

NOTES ON EXERCISE 38.

विशेषेण जिघ्रति इति व्याघ्रः।

N. B.—अप्राक्षम is Aorist from प्रच्छ (ज्ञीप्सायां) to inquire.

EXERCISE 39.

प्रत्यहं किञ्चनाभिनवं* शिक्षितुं यतस्व (प्रयस्यस्व)। परमात्मनास्मभ्यं ईक्षणे दत्ते याभ्यां वयं वस्तूनीक्षामहे। जनाः स्वकानि परिच्छिद्राणि न पश्यन्ति किन्तु परेषां निरीक्षन्ते एव। मा विस्मार्षीर्यत्किञ्चिदपि त्वं मात्रे धारयसि†। ईशो दुष्टान् दण्डयति गुणिनश्च परितोषयति। वत्साः! पितरौ सर्वथानुरुध्यध्वम्, इदमनुविधायित्वं ईश्वरस्याह्लादकं वर्तते। खगो वृक्षशाखाया उत्पपात। अस्तमनवेलायां निखिला भूमिस्तमसाच्छाद्यते। अध्यापकेन नियतेभ्यः पाठेभ्यो मा प्रमदीः। अहं तुभ्यं तव नाम पितुश्चावादिषम्। कस्यचित्पुरुषस्यासन् चत्वारः सूनवस्ते सर्वे तन्द्रा-

यन्त्रिताः । ये युद्धेऽरीञ्जयन्ते ते सर्वैर्जनैर्मान्यन्ते । सर्वदा-हमीश्वरं प्रार्थये + वाञ्छितञ्चलभे । जानकीं परिणीय रामस्तां सहादाय अयोध्यां प्रत्यागच्छत् । वर्त्मनि तेन वहवो दुःखदाः सुरद्विषो निजघ्निरे ॥

NOTES ON EXERCISE 39.

* New=प्रत्यग्रं, नवीनं, नूतनं, अभिनवम् ।

+ Object or aim=ईप्सितं, इष्टं, वाञ्छितं, मनोरथः ।

† By Pân:, धारेरुत्तमर्णः, *i. e.*, the creditor in the case of the root धृ is put in the Dative case.

N. B:—अवादिषम् is Aorist from वद् ।

EXERCISE. 40.

महेश्वराय नमः, यः सकलं जगदरीरचत् । तेषां अनुसारिणो भवत ये गुणायुताः खलानान्तु मास्म † भवत । प्रियतनयस्य जामातुश्च निधनं श्रुत्वासामुमूर्च्छ । ते ये पर-कीय भावुकाय यतन्ते संसारे यशः प्राप्नुवन्ति (पुण्य-श्लोका भवन्ति) । दण्डकवने निवसन्तोयतयोऽस्माभि र्दृष्टाः

पूजिताश्च । पुष्पेषोर्जाया रतिरित्यभिधीयते सा चातीव चारुगात्रा । लघुचेतसं शत्रोः शरणं मा गमः । भद्रनारीणां विनयमेवाभरणम् तद्दते ता न शोभन्ते (राजन्ते)। प्रियशिशो ! अत्रागच्छ्रदास्यामि ते यत्त्वमीहसे । स राज्याय ज्येष्ठेन भ्रात्रा सहायुध्यत । परं नालभत । यदा मनुष्यो विपद्भिः परिम्रियते तदा धैर्य्यमेव तस्य सुहृदस्ति । भ्रातृषु स्वसृषु पितृषु चा नुरक्तो भव । दुर्मतयो नरा दयां नार्हन्ति । परमात्मनो माहात्म्यचिन्तने ते मन आसक्तिं गच्छतात् ॥

NOTES ON EXERCISE 40.

† By Pân:—स्मोत्तरे लङ् च, *i. e*, when स्म is added to मा, the Imperfect can be used instead of the Aorist, *e. g.*, मा भूत=मास्म भवत ।

* By Pân:—स्पृहे रीप्सितः, *i. e.*, the person or the thing desired, in the case of the root स्पृह is put in the Dative.

EXERCISE 41.

त्वया पाठः स्मृतः, अधुना त्वं गच्छेः । अन्यैर्दत्तानुपालम्भान्नाहं सहिष्ये । अहमुद्यानं गतः, यतोहं बकुलवृत्तं पश्येयम् । राज्ञः सौधमेहि यदि त्वं दक्षिणायै* स्पृहयसि। यदि

त्वं मया + साकं मुम्बापुरीं गच्छसि तदाहं ते महान्तमापणं दर्शयिष्यामि । मनुष्याः सर्वदान्येषां शिवाय यतन्ताम् । यदि त्वं मां बहिर्गन्तुं कथयसि नाहं यास्यामि । किमङ्ग ! समवेतास्ते आरभन्तां संस्कारं नवा ? कोपि पुरुषोऽन्येषां विध्वंसनेन स्वकीयां भूतिं नेच्छेत् । पाषाणप्रक्षेपणैः (लोष्टघातैः) भेकाः † अवसान मवाप्स्यन्ति । किमत्र क्रीडार्थमागतोऽसि । तौ प्राप्नुयातां अमुष्ययतेः सम्पर्कं दीर्घकालपर्य्यन्तम् । यदि त्वमनृतं वक्ति, जनास्त्वामधिक्षेप्स्यन्ति । यदि वयं यौवने क्रीडेम तदा पश्चिमे वयसि खेदं प्राप्नुयाम ॥

NOTES ON EXERCISE. 41.

† Frog=मण्डूकः, भेकः, वर्षाभूः, दर्दुराः ।

* Vide—note * of Exercise 40.

+ By Pân:—सहयुक्तेऽप्रधाने, सह and other words having the same sense govern the Instrumental.

EXERCISE. 42.

यदि मम मनोरथावाप्तिर्भवेत्तदाहं आप्यायितो भविष्यामि । त्वं सर्वदा स्मरेः यत्किञ्चिदपि तेन तदवसर उदीरितम् । स नित्यं पाठशालामगमत् यतः स परीक्षायां

पारितोषिकं लभेत । यद्यपि त्वं भग्नाशोऽसि तथापि त्वमारब्धं न जह्याः । कदा मातुलगृहं गन्तुं चलेम । कतरोभयोः सेनयोर्विजयवती भविष्यतीत्यहं न जाने । अध्यापकेन प्रमत्तश्छात्रस्ताड्यते । मदीयानर्थान् गोपायेच्चेदहं तस्मै प्रतिग्रहं दद्याम । यदि नरोनिर्लक्ष्मीको भवेत् तदा †बान्धवैरपि परिहीयते । यज्ञमित्रः स्वीयानि दूषणानि प्रच्छादयेत् चेदहं तं भर्त्सयिष्यामि । वयं बहून् निब्दान् काश्यां न्यवसाम । यतो वयं वेदान्तं शिक्षेमहि । दुर्जनसंसर्गः (खलसम्पर्कः) सततं हेयः । किं त्वं न वेत्सि अनुमन्येथास्तस्य प्रस्थानं नवेति ? यदि घटं सहसा भञ्जीथास्तदाहं त्वां प्रबलं मन्ये । अहमाचरिष्यामि यथादिशेद्भवान् ॥

NOTES ON EXERCISE 42.

N. B.—उदीरितं is from ईर् to go with उद् ।

† By Pân:—प्रज्ञादिभ्यश्च, अण् (अ) is optionally added to बन्धु and it becomes बान्धव ॥

EXERCISE 43.

त्वं मे किं दास्यसि चेत्तव भ्राता वाञ्छितं प्राप्नुयात् । ते केवलं धनमुपचिन्वन्ति, तैरिदं कदा भोक्तव्यम् ? मा अवधीरअन्यान् शरीर दोषात् (आकृतिविकार हेतोः) ! मम

संस्थानमपि स्यात्परमहमन्योपगमनं याचनाय नैव करिष्यामि । यतयः फलमूलादिभिर्जीवितं निर्वाहयन्ति । स सर्वावृत्तीर्न्ययंसीत् मुमुक्षुश्चाभूत् । अहं ह्यो ज्योतिः—शास्त्रस्य नियमान् गोपालाय व्यवृणवम् । स दूरदर्शी (परोक्षप्रियः) विद्यते यतस्तेन तुषारकालाय धान्यमुपार्जितम् । तैरवधीरितोहं रोषं यातः । सुहृत्साहाय्यादृते किं कर्तुं शक्नोषि ? सखायौ * नष्टगवान्वेषणासक्तौ चिरं तां न प्राप्नुवाताम् । सैनिक उरसिघातितस्तूर्णमेव मृतिं लेभे । विधिव्यवस्थां निवारयितुं (यल्लाटलिखितं तत्प्रमार्जितुं) कः समर्थः ? † कदर्येणातिसञ्चयः कृतः किन्तु सर्व एव स्तेनैरपहृतः ॥

NOTES ON EXERCISE 48.

* It is equivalent to नष्टार्जुनीगवेषणव्यापृतौ ॥

† Miser=कृपणः, किंपचानः, कदर्यः, मितंपचः । 'नष्ट तिरोहितौ', इत्यमरः, *i. e.*, नष्ट is the synonym of तिरोहित meaning concealed, lost.

N. B:—न्ययंसीत् is the Aorist from यम ॥

+ नष्टगवीगवेषणासक्तौ ।

EXERCISE 44.

अहं स्वामिन आदेशेन कोष्ठस्य द्वारं समवृणवम्। कथं त्वमित्थं भाषणेन निजदारिद्र्यमाविष्करोषि (प्रकटीकरोषि)? अहं सौकर्य्येण अवन्तीपुरीं गन्तुं शक्नोमि संदेशञ्च राज्ञे प्रहितुं पारयामि। सर्वाः ‡ काष्ठा स्तमोऽलिम्पत्। किं स मम वाक्यानि नाश्रृणोत्? स स्वार्थाय नगरे स्थितिमालम्बे। हे देव! अक्षमा वयं तव गुणान् निवेदयितुम्, अस्मान् क्षमस्व। स नष्टं पुस्तकं × बहुरात्रमन्वैच्छत् परं नाप्नोत्। दुष्टशीला नरा अन्यान् वञ्चयित्वा स्वकार्याणि साध्नुवन्ति। प्रबलो वातो वृक्षशाखा † धुवति। वयं कस्य चिन्नरस्य हृदयं वचनैर्नुदनुमः। चातकाः कथं शुक्लान् + वारिदान् जलं याचन्ते? यदा स तत्समाचारमशृणोत् तदा शोकेन्यमज्जत्। त्वया परमात्मनः पूजयेदं वैभवं प्राप्तम्। इन्द्रजित् तस्यानुयायिनश्च लक्ष्मणं युद्धाय अधृष्णुवन्।

NOTES ON EXRECISE 44.

‡ Direction=दिक्, ककुभ्, काष्ठा, आशा, हरित्।

× By Pân:—अहः सर्वैकदेश संख्यापुण्याच्चरात्रेः, when रात्रिः is compounded with a numeral, the word सर्व and पुण्य, it takes the Suffix अच् (अ)।

+ Cloud=पयोदः, वारिवाहः, बलाहकः, जलमुक्, जीमूतः, पयोधरः, अभ्रम् ।

Worship=पूजा, नमस्या, अपचितिः, सपर्या अर्चा, अर्हणा ।

† The following couplet gives the various conjugations to which the root धू to shake, belongs:—

धूनोति चम्पकवनानि धुनोत्यशोकं चूतं धुनाति धुवति स्फुटितातिमुक्तम् । वायुर्विधूनयति चम्पक पुष्परेणून् यत्कानने धवति चन्दनमञ्जरीश्च ॥

EXERCISE 45.

अध्वर्यवः ! यूयमद्य सोमं सुनुयात । यद्यहमिदं विदध्याम्, तर्हि समज्यां प्राप्स्यामि । मा दुनु तं जन्तुं, स त्वां दंदयति । द्वौ भृत्यौ रथाङ्गं प्रत्यानेतुं कुण्डिनपुरं प्रहिणु (प्रेषय) । तस्मिन्नभ्रिडकानने त्वं किञ्चिदपि न प्राप्स्यसि । चम्वाः (अनीकस्य) संचलनानि समीक्षध्वम् यतो वयमाहवाय सन्नद्धा भवेम । कथं वयमरीणामवस्कन्दनं रोद्धुं शक्नुमः ? अनुजीविनो गच्छेयुर्मम † अर्वन्तं (अर्वाणं) विचिनुयुः । इच्छाम्यहं यत्ते एतादृग्भिः कर्म्मभिः स्वीय-निःसत्वं न प्रकाशयेयुः । जना यदि रोगान् वशीकुर्वन्तु तदा

शर्मभाजो भविष्यन्ति। नरा मुहुर्मुहुः संकल्पान् मा अन्यकुर्युः। अहं स्वामिनोऽनुज्ञां प्राप्नुयाच्चेत् त्वया सह क्रीडितुमेष्यामि। यदि त्वां तान् निन्दन्तं शृणुयुस्तदा त्वां ताडयेयुः। त्वया महदेनः समाचरितं, अध्यापकमुपगच्छ, तं क्षमार्थं प्रार्थयेति॥

NOTES ON EXERCIRE 45.

† Horse=तुरगः, तुरङ्गमः, अश्वः, सप्तिः, हयः, सैंधवः, घोटकः, मितद्रुः, मयुः।

अर्वति गच्छतीति अर्वा। *N. B*:—सन्नद्ध is the Passive Past participle fr m नह to tie.

EXRECISE 46.

अन्विष्यतां सिद्धान्तकौमुदी मदीया, * तामध्येतु ‡ कामोऽस्मि। स कटैर्भूमिं संवृणोति संप्रति विश्राम्यतु। सोमशर्म्मा दीर्घतमाश्च ग्रामं प्रति प्रहीयेताम्, तौ सत्वरं प्रत्यागच्छेताम्। यः शान्तये स्पृहयति स तृष्णां जह्यात् (हेयात्) ममोपदेशं शृणु तदा तव साध्येऽहाय सिद्धिर्भविष्यति। यदि स बहुशो यजेत् तर्हि शाश्वतं सुखं लभेत। तस्यावगतिमवलोक्य मम हृदयं दूयेत। एतद्दुर्गं कष्टं निस्तरितुं किमस्माभिर्विधेयम्। यदि युवां सामान्यदुश्चरितं कुर्वीयाथां तदा तथैव पीडयिष्येथे। मानव! मा सबलं नरं युद्धायाह्वयस्व। स मामप्रत्य-

वोचत् "अहं कदाचित् कञ्चित् पुरुषं स्वीयलाभाय न दोष्यामीति"। पितरौ मे नितरां व्यथितौ भविष्यतश्चेदहं तयोः † साधुर्नभवेयम्। ते तण्डुलान् क्षितौ विकिरेयुः, कपोतास्तानवचेष्यन्ति। पापाः संकल्पा दुर्जनस्य मानसं व्याप्स्यन्ति नतु सुजनस्येति॥

NOTES ON EXRECISE 46.

* The sentence preceded by this asterisk, can be written as मे पिपठिषास्ति तस्याः।

† By Vâr:—साधु असाधु योगे च, the words साधु and असाधु govern the Locative of that towards whom the goodness or otherwise is shown.

‡ By तुं काममनसोरपि. *i-e*, the infinitive with the final म dropped is joined with the nouns काम and मनस् to form an adjectival compound.

EXRECISE 47.

प्रभञ्जनः समुद्रजलं क्षुभ्नाति। किमधुना वृणामि उपशमं युद्धं वा? यदा नरो जृणाति (जीर्यति) तदा स सत्वरं गन्तुं न शक्तः। खगस्य पक्षान् लुनीहि तमुदके प्राक्षिप

च। किं त्वं विग्रहस्य कारणं जानासि ? एषां बकुल सुरभि सुमनसां स्रजमेकां ग्रथान। स्वीयदौहित्रस्य स्मरणं ममचित्तं क्लिश्नाति। * अभ्यवहारसमये प्रतिदिनं + किमश्नासि ? कण्ठीरवा निजोपहारेषां शरीराणि हणन्ति अश्नन्ति च। हे भगवन् ! अस्मादृशान् पापिष्ठान् स्वकीय पादयोर्जलेन पुनीहि। आपणं गच्छ, मह्यं रजतभाण्डे क्रीणीहि। अस्मान् ग्रामाय ‡ गन्तुमनुजानीहि। किंकरो वेदिकां कटैः परावृणोति प्रभोरादेशेन। मा मुषाण अन्यस्य स्वं, तेन चागारं पृणीहि। अस्माद्राशेः यावन्तं नीवार मिच्छन्ति तावन्तं गृह्णन्तु।

NOTES ON EXRECISE 47.

दुहितुः सुतः, इति दौहित्रः। Yaskacharaya, the author of the Nirukta, gives the etimology of दुहिता, as follows:—दुर्हिता, दूरेहिता, [illegible]। or from दुह्.

* Victuals=भोज्यं, भक्ष्यं, भोजनं, खाद्यम्।

+ Day=दिवसः, वारः, वासरः, अहः, घस्रम्।

To eat=भक्ष; अद; अभ्यव+हृ; खाद, घस।

‡ By Pân:—गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि, *i. e.*, in the case of roots implying motion, the place to which motion is directed is put in the Dative or Accusative case when physical motion is meant.

EXERCISE 48.

देवाः समुद्रं (वार्धिं) अमथ्नन् तस्माद्बहूनि रत्नानि प्राप्नुवन् । किमहं ग्रहीष्यामि तत्पुस्तकं यन्मे दीयते । ते तावन्नरं स्तम्भेऽवध्नंस्तदनन्तरं परुषमताडयन् । हे दयलवो देवाः ! मे पितरौ संप्रतिजूर्णीतः (वार्धक्यं गतौ; जीनौ; जीर्णौ, निष्कलौ) तयोर्दृष्टिप्रसादं कुरु । किं त्वमस्मिन् बहुलतमसि निजसुहृदमभिज्ञास्यसि ? रामो विश्वामित्र-साहाय्येन बहून् निशाचरान् अमीनात् । भोः सुहृदः ! कियच्चिरं युष्माकं मनांसि अहं क्लेशिष्यामि ? अधुना मां गमनायानुजानीहि । यदा त्वमेकाकी भ्राम्यसि तदा त्वया सलगुडेन भाव्यम् । स राजानं प्रशंसया अप्रीणात् । यतो भूरि धनं लभेत । स्तेना ममवेश्मनि प्रविष्टा यतस्ते किञ्चिदपि मुष्णीयुः । ऊर्वशी चित्रलेखयोपदिष्टा पुरूरवसमवृणात् । अकिंचना दुर्भिक्षसमयेप्राणान्यप्यद्युः । कियता मूल्येन तत्पुस्तकं व्यक्रीणीथा † यत्त्वं ह्योऽक्रीणाः ?

NOTES ON EXERCISE 48.

विश्वामित्रः=गाधिसुतः=कौशिकः ।

रामः=दाशरथिः, कौशल्यानन्दनः ।

† By Pân:—परिव्यवेभ्यः क्रियः, क्री to buy, takes the Atmanapad when preceded by परि, वि and अव ।

*By Pân:—परिक्रयणे सम्प्रदानमन्यतरस्याम *i. e.*, the root क्री with परि optionally governs the Dative of the price at which one is hired. The exposition of this aphorism is meant to serve as caution to the student not to use the Dative in cases similar to that of the sentence marked in the exercise. For, परि-क्रयण here means hiring and not buying as says Sid. Kau, नियतकालभृत्यास्वीकरणं परि-क्रयणम् ॥

EXERCISE 49.

धेनुं क्षेत्रे रुन्धि सा हरितानि (पालाशानि) तृणानि अत्ति। वत्साः ! मा रुदित, एषा आयाति फलहस्ता वो माता। कानि पुस्तकानि पाठशालायामधीषे ? त्वं तं परुषा-क्षरैर्द्वेक्षि परं स त्वां ईट्टे। ते दिवा दीर्घकालं शेरतेऽलसाश्च जाताः। ईश्वरादन्यं मा भक्त्या प्रीत्या चोपाध्वम्। धनाढ्या दरिद्रान् द्रव्यदानेन † पान्ति । बालकाः ! अत्राध्वम्, अहं युष्मभ्यमेकां रम्यां कथां वक्ष्यामि। सर्वदा सत्यं ब्रवीति स, परेषां गुणान्स्तौति च । कार्तिके मासे ‡ स्त्रियः प्रातर्नित्यं स्नान्ति। त्वं न वेत्सि यज्जन स्थानं गोदावरीतीरे स्थितम्।

हे गतायुषि ललने ! समाश्वसिहि शीघ्रमेव त्वं निजसुतौ द्रक्ष्यसि । ये स्वीयापराधान् अध्यापकाद * पह्नुवते ते दुर्वृत्ता विद्यार्थिन उच्यन्ते । अधुना शीतलो वातो वाति, आसामहै नद्यास्तीरे । सर्वदा तान् पाहि ये त्वत्र शरणं व्रजन्ति, न कदापि तान्जहि ॥

त्वां

न

NOTES ON EXERCISE 49.

† दानं=giving, charity=वितरणं, निर्वापणं, विश्राणनं ।

‡ Woman=योषा, योषित्, नारी, ललना, रमा, वामा, अङ्गना, महिला, जामिः ।

* By Pân:—अन्तर्धौ येनादर्शनमिच्छति, *i. e.*, when concealment is indicated, the person whose sight one wishes to avoid is put in the Ablative.

EXERCISE 50.

किं म उदीरिष्यसे यत्कस्येदमुद्यानमिति ? अभ्यवहारं ते आन्ति तत्पश्चात् * जक्षति । हरिः शौर्य्येण धिया च राममत्यशयिष्ट । सुमित्रा द्वौ सुतौ लक्ष्मणशत्रुघ्नौ सुषुवे (प्रासूत, प्रासोष्ट) । यदा स प्रियतम मातुः पञ्चतामश्रौ-

षीत् तदा भृशमरोदीत् । यदहमाचक्षे तस्मिन्न विश्वसिष्यसि । सूपकारेण पाचितं (श्राणं, श्रपितं) भोजनं कृत्स्नमघसन् (अजक्षुः) । व्याघ्रो द्वौ पर्वतादवतरन्तौ पथिकावप्सात् । तैर्वयं पृष्टा 'शुद्धुपवासदिनेषु किमस्माभिर्भोक्तव्यम्, इति, । एको निर्लक्ष्मीकः पुमान् मां प्रति इत्वा मामवादीत् यदहमकिञ्चनो मे किञ्चिद्धनं देहि । वितृष्णा द्रव्यार्थं ईश्वरान् नोपासते । रामस्य जामाता काव्यप्रकाशमध्येतुं काशीमैत् । स गृहमागतान् भिक्षुकानुपायनैः प्रीणयति ॥

NOTES ON EXERCISE 50.

* By Pân:—जक्षित्यादयः षड्, नाभ्यस्ताच्छतुः, the root जक्ष् takes अत् instead of अन्त् as the termination in the 3rd person plural.

† Intellect=मतिः, बुद्धिः, धी, धिषणा, मनीषा ।

N. B:—शी to lie with अति means to surpass.

EXERCISE 51.

ते ये कर्तव्यमतियन्ति लोके वाच्यतां यान्ति । कथं भंगुरा जन्तवो वयं परमात्मनो गौरवं वेदिष्यामः (ज्ञास्यामः)? प्राणिति कुत्रचिदेतादृशो मानवो य एवंविधं दारुणं वृजिनं

कुर्यात् ? मत्स्या गाधोदके चिरं न निश्वसन्ति, ते सत्वरं मरिष्यन्ति । यदि त्वं धनमभिलषसि, तर्हि गच्छ रैपतीन् मधुरवचोभिः (चाटूक्तिभिः) प्रसादय । यदा ते दुरात्मानो देवानुपासते तदा ते तान् प्रमार्जन्ति । गोविन्द ! कृपयाभ्यन्तरमागच्छ, आख्याहि मे किमिदं चित्रे रम्यमस्ति ? किं त्वं तास्तारका गणयितुं शक्नोषि या रात्रौ चकासति ? स वृक्षशाखामदात् गृहं च निनाय । मा आस्ख यावत्कालं तत्राध्यापको नास्ते । नरो दीनानां प्रार्थनां न प्रत्याख्यायात् यदि दातुं धनस्येष्टे † अवेहि अध्यापकस्य नाम × यस्मात्त्वमादौ संस्कृत भाषामशिक्षथाः । अहर्निशं कर्म्म कुरु यदिह जगति ससुखं जीवेः (श्वस्याः, अन्याः) । कथं मे कामुक आयास्यति कथञ्चाहं तेन सहालापं करिष्यामीति + विन्दानायास्तस्या रात्रिर्व्यतीयाय ॥

NOTES ON EXERCISE 51.

'Sweet words' can also be translated as वल्गुवल्गितानि । अहश्च निशाचेति अहर्निशम ।

† By Pân:—अधीगर्थदयेशां कर्म्मणि, *i. e.*, verbs implying to be master of, to rule, to have compassion and to remember with regret, govern the objects of these actions in the Genitive case.

× By Pân:—आख्यातोपयोगे, *i. e.*, the teacher from whom some thing is learnt, is put in the Ablative case. Beautiful=रम्यं, रुचिरं, रुच्यं, मनोहरं, मनोरञ्जकं, मनोज्ञं, मञ्जुलम् ॥

+ The various senses of विद् are already given. The student is referred to Notes on Exercise 16.

EXERCISE 52.

नुहि तं यस्त्वामसृजत् । टीकाकारः सूत्रार्थं व्याचष्टे प्रकटयति च । अरीन् युधि हत्वा स आत्मशरीरं रुधिरेण लेढि । गोपाल ! धेनुं धुक्ष्व (दुग्धि), समुचितावसरोयं कर्तुमिदम् । जागृहि, आरभस्व अध्यापकेन नियतं कार्य्यम् । योलोकं शास्ति स भूपतिरित्युच्यते । मा लीढां अली पुष्पस्थं मधु । वयं तान् नुमो ये सदाचारिणः किन्तु तद्विपरीतेभ्यो द्विष्मः ! अनिष्टं द्विड्ढि, अभीष्टञ्च वाञ्छ । अनुचराः स्व स्वामिनः प्रवेशकाले गृहं संमार्जन्ति । किं अवेषि त्वं तेषां नामानि ये संमेलन उपस्थिताः । जैनाः कदापि विडम्बनायै जन्तुं नैव घ्नन्ति । किं भगो ! अधियीय व्याकरणनियमान् ? न वयमन्यान् तदुपार्जितधनेन विना कर्तुमुश्मः † ॥

NOTES ON EXERCISE 52.

व्याक्रियन्ते शब्दा अनेनेति व्याकरणम् ।

N. B:—The word मधु is Neuter The synonyms of रक्त are the following:—

शोणितं, रुधिरं, असृक्, रक्तम् ।

† छान्दसोयं धातुः, *i. e*, according to Pânini, the root वश् to desire is limited to the Veda. So far as we know, there is no other well-known root of the 2nd conjugation meaning to desire. Hence it was unavoidable.

EXERCISE 53.

द्वौ ब्राह्मणावेकस्य धनाढ्यस्य सविधेऽयातां, अख्यातां च "यद्वयं धनहीनाः"। ते सखिभ्योऽद्विषन्, अतस्ते भुवि दोषास्पद † मभूवन्। यदि वयं अनालोच्य (असमीक्ष्य) निरर्थकं जन्तून् हन्मस्तर्हि लोके दुर्मनसोऽवगस्यामहै। योलोकानां शासिता, स स्वकीय हितायैव न स्पृहयेत्। शिवाजेः कतिपयाः ‡ पुत्रपौत्रा राष्ट्रस्य विस्तीर्णभागानशासुः। कति कृत्वस्ते त्वां प्राहरन्, बटो! वर्चस्विनी महिषी देशं न्यायानुसारेण शिष्यात्। अहमीशि तस्य सर्वस्य यन्मम नयनपथमगमत्। विद्याम वयं स्थानस्याभिधानं तदा

कितव प्रवंधं विशदी—कर्तुं समर्थाः। त्वं तस्मै अद्रुह् यतो जाल्मास्त्वां स्तुवन्तु। विहगाः * पादपमध्यासाञ्चक्रिरे तान् जघ्नुर्दुष्ट बालकाश्च। ये क्षान्तिशीलास्ते निन्दकेभ्योऽपि न द्विषन्ति। ते रात्रित्रयमविदुः यदा ऋषेः शिष्या वेदान् प्रकर्तुं प्रवुद्धाः। यदि त्वं कर्णौ पिदधासि (संवृणोषि) यदा स वाक्यार्थं व्याख्याति (विवृणोति; व्याचष्टे) तर्हिकथं त्वं पुनरिदं वेदितुं शक्ष्यसि ?

NOTES ON EXERCISE 53.

† The words आस्पद, भाजन, पात्र, and प्रमाण are always used in the singular neuter, when single or compounded and qualifying some other word in the sentence; as, अत्र भवन्तः प्रमाणम् ॥

ब्राह्मणः=भूसुरः=भूदेवः, द्विजः ॥

* By Pân:—अधिशीङ् स्थासां कर्म्म, *i. e.*, the roots शी, स्था and आस् govern the Accusative, when preceded by अधि ॥

‡ By Pân:—प्रथमचरम तयाल्पार्धं कतिपयनेमाश्च, we have two forms of कतिपय and of others, *i.e.*, कतिपयाः, कतिपये in the Nominative Plural.

N.B:—उप+कृ to serve, to do good.
अप+कृ to do injury to.
परा+कृ to reject.
उत+कृ to inform against.
उदा+कृ to censure; to overcome.
प्र+कृ to outrage; to recite.
अनु+कृ to follow; to act up to.
वि+कृ to produce sounds
अधि+कृ to overpower; to authorize.

EXERCISE 54.

स पटुर्वटुरासीदिदं मेऽभात्। आख्याहि तद्यत् त्वमभिरूपादाचार्य्यादशिक्षथाः। कालिन्द्याः सख्यः उत्तरीयाञ्चलेन तस्या † अश्रूणि अमार्जुः। योधौ बाणान् विषेणालीढां यतस्तौ रिपून् हन्याताम्। निगदिष्यसि कदा त्वं धेनुमधोक्? नरः परेषां गुणान् न अपह्नुवीत आत्मीयदोषांश्च। स गोविन्दमूचे "यदहं पुनर्गृहं प्रवेष्टुं न वश्मि"। गोविन्द उवाच "यदि त्वं मां भूयो द्रष्टुं न वक्षि, तर्हि हेतुमाख्याहि"। अत्रास्यतां तावद्यावदहं परशुराममुपगमिष्यामि तमाकारयिष्यामि चेति। वर्षाकाले वारि (वाः) प्रस्तराणां रन्ध्रेभ्यः स्नौति। तं दुःखदं वृत्तान्तमाकर्ण्य सा तपस्विनी (वराकी)

चालिका दीर्घन्यश्वसीत। प्रिय सुहृन्मकरन्द ! प्रिये मदयन्तिके ! युवां समाश्वसितम्। हे महीपते ! यदि त्वं न्याय-करुणाभ्यां शासिष्यसि तर्हि ते प्रजास् त्वयि कदापि विरक्ता न भविष्यन्ति ॥

NOTES ON EXERCISE 54.

* Clever; proficient=निपुणः, प्रवीणः, चतुरः, दक्षः विचक्षणः, निष्णातः, पटुः।

† Tears=अश्रूणि, अस्राणि, नयनवारीणि, वाष्पाणि। प्रावृषि=प्रावृट्समये,=जलधरसमये=वर्षासु=in the rainy season.

N. B:—व्रतिशोच्यौ तपस्विनौ इति पुरुषोत्तमः, तपस्वी means both pitiable and an ascetic.

EXERCISE 55.

ते प्रत्येकं भिक्षुकाय यस्तान् जिहीते, द्रविणं ददति। न जिह्रेषि घोषयितुं स्वगुणान् जिह्वया ? ललना स्वर्णभूषणानि परिधाय शिवायतनमजिहीत। अपात्रेभ्यो धनं मा देहि यद्यपि ते दरिद्रति। तमस्तपना† द्बिभेति अतश्चैव कन्दरायां निलीयते। भगवद्भक्तिप्रयतो भूदेवः प्रथमं हस्तपादं नेनेक्ति तदनन्तरं धर्म्मकृत्यानि विदधाति। अत्रकेचिदाहुः—

'स्मार्तोयं विधवानां पुनरुद्विवाहः'। * लक्ष्मणः सीतां कठोरगर्भां कानने ऽजहात् प्रत्याजिहीत चायोध्याम् । नरो विश्वासघातकेन शत्रुणाऽपि संदह्यात् । ते तण्डुलान् अमिमत कुण्डवं संख्यां लिखितुं व्यस्मरन् । ये गुणादोषं वेविजति ते प्राज्ञाः स्मृताः । शेषः कृत्स्नभुवो भारं भोगसंभारे विभर्ति । त्वं कुत्र तद्धनं न्यदधाः यदहं तुभ्यं ह्योऽददाम् । आहवरवे ते कोषानपि अजहुः सर्वासुदिक्षु पलायिषत ॥

NOTES ON EXERCISE 55.

† Sun=रविः, सूर्यः, दिनकरः, दिनेशः, प्रभाकरः, अर्कः, घर्मांशुः, भास्वान्, सप्तसप्तिः, सहस्रदीधितिः विकर्तनः।

* By Vär:—'लक्ष्म्या अच्च', the ई in लक्ष्मीः is changed to अ, and the suffix न is added in the sense of possession.

सीता=लाङ्गलपद्धतिः, furrow.

N. B:—पलायिषत is Aorist from अय to go with परा preposition.

कीयं श्यालं साचिव्ये न्ययुङ्क्त। यदि कश्चित् पुरुषस्तव गृह मायात् तर्हि पृच्छ, तं यत्स किं याचते। त्वमौषधद्रव्यमपि-नद् भाण्डे पावकस्योपरि न्यदधाः। त्वं मे समस्तं शोकं व्यानक्क किन्त्वहं तव शान्त्यर्थं किमपि कर्तुं नालम्॥

NOTES ON EXERCISE 57.

† By Pân:—कृत्वोर्थप्रयोगे कालेऽधिकरणे, *i. e.*, the numeral adverbs of time such as द्विः, त्रिः govern the genitive of the time in the sense of the Locative.

* Deer=मृगः, कुरङ्गः, वातायुः, वातप्रमीः, अजिनयोनिः।

EXERCISE 58.

प्रकृतयो निजाधिपे स्नेहं व्यञ्जन्तु। यदि सोऽनपकारिणो जन्तून् तृणेढि तदा पापमेवाश्रयेत्। मा भुङ्क्ष्व फलमदस्तत्तु † अभ्यन्तरे कृमिकुलाचितम् *। यदि त्वं गोपालं न रुन्ध्यास्तदा स वृक्षस्य शाखाश्छेत्स्यति। अहं तं तस्याह्वां पृच्छामि, स ममाग्रे निवासस्थानं कथयति। भाण्डं रिङ्धि पुनस्तत् तैलेन पिपूर्हि। हे धनिक! अकिञ्चनानां भिक्षुकाणां आशा मा भङ्ग्ध्व। स अमात्यपदवीमारोपितः,

चिरायेदं भुङ्क्तां भवानिति तेऽगादिषुः। मूषको हरिणेनोक्तः—"मम पाशांश्छिन्द्धि मुञ्च च माम्"। नलं दमयन्त्याः कोष्ठं प्रविशन्तं कोपि नारुधत् (नारौत्सीत्)। मगधानां नृपो महतीं चमूमादाय प्रतस्थे यतस्स कुसुमपुरं रुन्ध्यात्। शुकं मा हिन्धि, अयन्तु भूतले समुपसर्पितुमसमर्थः। गतरात्रे स उपवासमतत (अतनिष्ट), अतोहं जीवितस्थित्यर्थं तस्मै किञ्चिद्दास्यामि। वेत्सि त्वं यल्लोभो जनेषु मानमखिलं हरति? विशिन्ड्ढि विविधान् धातून्, यतोहं तेषां गुणान् निरूपयामि॥

सर्प्तुम्

रात्रौ

ण

NOTES ON EXERCISE 58.

* Full=भृतं, भरितं, आचितं, निचितं, पूर्णं, पूरितम्।

N. B:—अरुधत् and अरौत्सीत् are two forms in the *Aorist* of रुध् to obstruct.

† अदः is neuter, Nominative Singular. The following doggrel gives the correct use of the pronouns:—

इदमस्तु संनिकृष्टं समीपवर्ति चैतदो रूपम्।
अदसस्तु विप्रकृष्टं स्यात् तदिति परोक्षे विजानीयात्॥

EXERCISE 56.

बालक ! अवधेहि यदहं त आख्यामि । वेविड्ढि दुर्गं सर्वाभिः ‡ सेनाभिस्तदा मामाह्वय । मुनिना संसारानिष्ट-भीतेन न भाव्यम् । यदि त्वं चक्षुषी † पिदधासि, तर्हि किं त्वमनेन पथा गन्तुं सक्षेमं शक्नोषि? नरोऽसमीक्ष्य कर्म्म नैव विदध्यात् । प्रबन्धोऽयं तेभ्यो लाभदायको भविष्यतीति ते मतिर्नवेति ? कृष्ण ! आगच्छ निजकार्यमारभस्व, मा निर्व्यापार इतस्ततो भ्राम्य । त्वं निजकोषं भूतले निदध्या यतस्स्तेना इमं नापहरेयुः । स्थानं नेनिग्धि गोमयस्य विलेप-नेन, पश्चात्तदुपरि आस्स्व । यतयो जलाशयं गच्छन्तु पिपुरतु तुम्बीं सलिलेन । मा जहीहि (जहाहि, जहिहि) विघ्नभयात् यत् त्वमेकदारभसे । हे भृत्य ! त्वं तावद् द्वारमपिदध्या-स्तदनु निद्रां सेवस्व । तौ पिशाचात् सुतरां भीतौ, अतस्तत्र मा जिहीष्व । प्रथमं द्विषो बलं मिमीष्व तदा तेन सह योद्धु गच्छ । हे स्वामिन् ! परेषामपकारान् प्रतिविधातुमसमर्थ-श्चेत् तर्हि प्रव्रज्यामवलम्बस्व, अग्नौ जुहुधि ॥

NOTES ON EXERCISE 56.

नृणाति नयति इति नरः ॥

‡ इनेन स्वामिना सह वर्तते इति सेना ॥

N. B:—पिपुरतु is Imp. third person plural from root पृ to fill.

† वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः ।
आपं चैव हलन्तानां यथा वाचा निशा दिशा ॥

The grammarian भागुरि desires the elision of अ from the prepositions अपि and अव, and the addition of आ to वाच्, निश् and दिश् ॥

EXERCISE 57.

सोऽग्नेः समीपमास्ते तं भस्त्रया सह इन्धे । प्रायेण द्विरह्नो † भुञ्जमहे परं कतिपये पुरुषास्त्रिरह्नश् चापि । त्वया कुलालनिर्मितं मृद्भाण्डं भिन्नम् । चन्द्रगुप्तस्य सेनाभिः स्वर्णपुरनाम नगरं परिवृतं गृहीतञ्च । * हरिणस्यान्तिकं गत्वाहं पाशान् अछिनदम् । चन्द्रापीडोऽग्रस्मरणव्यथित-मानसः किञ्चिदपि सुखं नाभुङ्क्त । मातरस्तावत् स्वान् पुत्रान् तैलेनाञ्जन्ति तदनन्तरं उष्णोदकेन प्रमार्जन्ति । हिंस्रा अन्यान् श्वापदान् आत्मीयाहारार्थं हिंसन्ति (तृंहन्ति)। त्वं जरासन्धस्य वपुः क्षुणत्सि । अध्यापको यानि कानि विषमपदानि अध्ययनमार्गे दृश्यन्ते तानि सर्वाणि विशिनष्टि। कथं त्वं मां निर्धनेभ्यो द्रव्यं यच्छन्तं रुणत्सि ? राजा स्व-

* By Pân:—प्रत्याङ्भ्यां श्रुवः पूर्वस्यकर्ता, *i. e.* in the case of root श्रु with प्रति and आ meaning to promise, the person to whom something is promised is put in the Dative.

EXERCISE 61.

त्वं मुमोहिथ यदा त्वं तमुदन्तं मत्तः शुश्रोथ। त्वं चहन्मिषे तानि पापानि यानि ते चक्रुः। महिषा नद्यास्तीरमीयुस्तत्सलिलञ्च जगाहिरे। स्वाहाभुजः पौलस्त्येन पीडिता † विष्णुमूखुस्तं तुष्टुवुश्च। त्वं ददर्पिथ यदा त्वं स्वाभिलषितं साधयामासिथ। जननी (प्रसूः, जनयित्री) यमौ सुषुवे परं तौ तूर्णमेव मम्रतुः। कथं त्वं मुधैव आत्मीयोपजीविने चुक्रोधिथ ? देवो मनुष्यस्य तपसा प्रससाद (अभिदध्यौ) च तं "वरं वृणीष्व"। स पादपं लुलाव ततः स्वयं चस्खाल। त्वं बहून् भटान् जघनिथ, यदा ते त्वयासार्द्धं युयुधिरे। ते सर्वाणि तानि फलानि जह्रुर्यानि भृत्या आपणे निन्युः। युवां भूमिं चखनथुः परं किञ्चिदपि नाधिजग्मथुः। पञ्चपाण्डवा द्रुपदसुतां परिणिन्यू रामस्तु केवलां जनकात्मजाम्॥

इति च

NOTES ON EXERCISE 61.

† वेवेष्टि व्याप्नोति चराचरं जगदिति विष्णुः । रावयति लोकान् इति रावणः । पौलस्त्यः=रावणः ॥

* The different meanings of केवल are given in the following line:—केवलः कृत्स्न एकश्च केवलश्चावधीरितः ॥

EXERCISE 62.

अध्वने संभारान् कृत्वा स शुभेऽहनि प्रतस्थे । ते तरीभिस्तटिनीं तेरुः, कान्तारञ्च समासेदुः । किंकराः सकलां † महीमाटुः परमश्वं नैवलेभिरे । यदा त्वं शुभ्राणि वासांसि ववसिषे तदातीव बभ्राजिषे । कतिदिनानि मणिपुर उवसिथ ? यद्भवानूचिषे तदतीवकर्कशम्, मे मानसञ्च सातिरेकं विव्यथे । यदा तस्यपितरौ जजरतुस्तदा प्रपौत्रैरपि अवधीरयाम्बभूवाते त्वमेव रणधुरंमुवहिथ येनारयो जनपदमभिजग्मुः । तन्तुवाया बहूनि कौशेयवस्त्राणि विव्युस्तानि राज्ञे विससृजुः । स्वप्ने वयमस्माकं सज्जुषमागमनाय जुहुविम । कदा त्वं राजद्वारमारिथ अस्याभिख्याञ्चददर्शिथ ? नृपः स्वीयराष्ट्रस्य न्यायानुरोधत ईशाञ्चक्रे अतोऽसौ प्रजानामनुरागञ्चानर्ह। जनाः किञ्चित्कालं भूमौ निषेदुस्ततः

EXERCISE 59.

यदा स † नष्टात्मजं प्राप तदा मुमुदे। सुरद्विष ऋषीणां पर्णशालास्तद्वास्तव्यांश्च चिक्लिशुः। ते बहूनि पुस्तकानि चिक्रियु गृहञ्च निन्युः। विष्णुस्तिग्मतपसा अधिजगे पारितोषिकञ्चाधिजगाम। गोविन्दः सुहृद्भिश्चिक्रीड तस्याध्यापकस्तं प्रजहार निनिन्द च। त्वं भ्रातृकलत्रद्रव्यं (प्रजावत्या धनं) जगर्धिथ परं न विवेदिथ। तौ कदाचिदपि न त्वां स्वकृत्यपूर्तिं रुरुधितुः। यज्ञदत्तो ग्रन्थं प्रणिनाय यः शीघ्रमेव विततकीर्तिर्बभूव। भृत्याः सर्वद्वाराणि संवृत्य शिश्यिरे। दशरथः सरयुकूले सत्राम् इयाज। वृत्तशाखाया बहूनि पुष्पाणि सस्रंसुः। आयुधयुक्तैर्नरैर्नगरं सर्वतस्ते परिवव्रुः। त्वं शरणागतयाचकेभ्यो बहून् रूपकान् ददाथ। किं त्वं शुश्रोथ यत्किञ्चिदपि तस्मिन् काले हरिर्मां प्रति जगाद ?

NOTES ON EXERCISE 59.

† नाशः क्षये तिरोधाने, इत्यमरः, The word नाश means non-existence and disappearance. ऋषन्ति पश्यन्ति स्तोमान् इति, or ऋषयो मन्त्रद्रष्टारः so says यास्काचार्य्यः॥

शोभनं हृदयं यस्य स सुहृद्॥

EXERCISE 60.

त्वं कार्यं सम्पादयितुं मे प्रतिशुश्रोथ किन्तु कर्तुं न शेकिथ । रिपुर्नगरमवचस्कंद परं नागरिका अवस्कन्दनं प्रतिचक्रुः । योधा अरिषु शरान् चिक्षिपुस्तैः कतिपयाश्च घातिताः । रामो मारुतिं लंकां प्रजिघाय "सीतानुसंधीयतामिति" तं व्याजहार । महिष्या द्वे मित्रे वाटिकां जहाते, कतिपयानि पुष्पाणि संचिच्यतुः । किं त्वं गतरात्रौ किञ्चिदपि न † जघसिथ (आदिथ), अतः कुत्र त्वं निशां निन्यिथ ? किंकरा गांवत्सं स्तम्भे बध्वा गां दुदुहुः । क्षुब्धे समुद्रे कश्चिदपि जालिको मत्स्यं ग्रहीतुं न दधर्ष । स विवेद यत्त्वं तं बभणिथ । बहवः स्तेना मम गेहं प्रविविशुर्महार्हवस्तूनि च चोरयामासुः । सीता स्वजन्मना जनकस्यान्वयं पुपाव । मांसलो मानवः कराठीरवं तथा ददार यथा स क्षाणं दृणाति । शिष्यास्त्रिपाठानधिजगिरेऽध्यापकश्च तान् गृहं गन्तुमनुजज्ञौ । अहं विस्मरामि यत्किञ्चिदप्यहं निद्रायां जजल्प । त्वं जिह्मयाञ्चकर्थ यदा त्वं स्वीयरिपुं ददर्शिथ ॥

NOTES ON EXERCISE 60.

† By Pân:—लिट्यन्तरस्यां, the root अद् to eat optionally takes the substitute घस in लिट्॥

शादहं पावके क्षेप्स्यामि आत्मानं विषमपि अत्स्यामि चेति" रामः कैकेयीं बभाषे । अनेन महीपेन प्रातिवेशिकैर्जन्यं समारब्धं, किन्तु ते निश्चितं तं विजेष्यन्ते । युवतीं नाभसी वाणी व्याजहार "त्वं वैशाखस्य पौर्णमास्यां मर्तासि" । दूरमपसर, जाल्म ! नोचेल्लगुडेन ताडयिष्याम्यहम् । यदि शासिता प्रजानां सुष्ठु ईशिता तर्हि तास्तस्मिन्ननुरक्तारस्तस्याधिपत्यञ्च स्थायि भविता ॥

NOTES ON EXERCISE 64.

आ समन्तात् रमन्तेऽस्मिन्निति आरामः ।

The synonyms of वृक्ष are as follows :—

† वृक्षः, द्रुमः, पादपः, तरुः, शाखी, महीरुहः, अनोकहः, अगमः । *N. B*:—The root मृ to die is Pras. in the Perfect, in the two futures and the conditional.

EXERCISE 65.

यदि ते पिताद्य संनिधावभविष्यत्तर्हि वन्दनीयाय अभ्यागताय त्वां प्रादास्यत् ॥ यदि तस्या आदिमः पतिः प्राक् प्रभातान्नात्र प्रपत्ता तर्हि सा अन्यं वरीता । इमं बालकं

* Used only in modern times in this sense.

निषद्यां मा गमय स केनचिन्नरेण वञ्चयिष्यते। यद्यङ्गुलीयकं प्राप्तकालेऽलप्स्यत तर्हि दुष्यन्तः कठोरगर्भां शकुन्तलां न प्रत्यादिक्ष्यत्। † स्तेना राजद्वारं नेष्यन्ते ताडयिष्यन्ते च स्व स्व पापानुकूल्येन। *समाचारोयं यदि दिनद्वयात्पूर्वमगदिष्यत राजकुमारस्य जीवितं मरक्षिष्यत। यदेदं चित्रं विचक्षणैर्द्रक्ष्यते तदा चित्रकारस्तोष्यते। राजसभैतादृशमपराधिनं नैव त्रंस्यति किन्तु स सद्यो हनिष्यते। यदि तस्मिन् काले त्वमपमानमवक्ष्यः, तर्हि युद्धाग्निरयं नैवैन्धिष्यत॥

सारतः

ते

NOTES ON EXERCISE 65.

† The synonyms of चौर are the following:—स्तेनः, कुम्भीरकः, तस्करः, गण्डपदः, पाटच्चरः, मलिम्लुचः। अगति अच्यते वेति अग्निः॥

(अथ गाथोपक्रमः)

EXERCISE 66.

कर्णश्चाश्वत्थामा च कौरवाणां वीर्य्यवन्तौ (ऊर्जस्वलौ) पाक्षिकौ बभूवतुः। पाण्डवकौरवयोराहवे धृष्टद्युम्नो द्रोण-

ध्या

द्यौ

पयालाञ्चक्रिरे । इन्दुमती अजो च पथा गच्छन्तौ चित्रा-चन्द्रमसाविव चकासाञ्चक्रतुः ॥

NOTES ON EXERCISE 62

† It is equivalent to पृथिव्यां भ्रेमुः ।

N. *B*:—ह्वे becomes हु in the Past perfect.

EXERCISE 63.

युवको व्याघ्राद्बिभाय परं तस्य माता तं तत्रे । यदा ते जजरुस्तदा पुस्तकान्याददुः पाठांश्च स्मर्तुमारेभिरे । कथं त्वं रथ्यां नो ममार्जिथ यदा ते प्रभुरनया जगाम । तेऽसूयाभावान् मास्प्रति व्यानञ्जुः । त्वं तेषां व्यलीकानि जगूहिथ जहसिथ च यदा ते तानि स्वयं जुघुषुः । त्वं तामिन्दुमतीं चकमिषे परन्तु सा प्रार्थनां * प्रत्याख्यात (निराचकार)। तेन ‡ व्याजह्वे "यदहं त्वामद्यरात्रौ द्रक्ष्यामीति"। गाथेयं ममावुत्तेन जगदे । ते मन्त्रयामासुः किन्तु किञ्चिदपि न निश्चिक्युः । किं स रिपुर्येन स निसुषूदे समीपमासाञ्चक्रे । † भिक्षुर्धनिनं प्रार्थयामास परं स तेन किञ्चिदपि न ददे । यदा त्वं पिशाचात् त्रेसिथ (तत्रसिथ) तदा कथं स न जुहुवे ? मुनीनां तपांसि स्तविथे, ब्रह्मा च तैस्तुष्टुवे स्तवना-

र्थम् । वाचंयमानां निकेतनानि उन्मुमूलिरे ते सर्वे निर्दयं निः सारयाम्बभूविरे ॥

NOTES ON EXERCISE 63.

† Beggar=वनीयकः, याचनकः, मार्गणः, अर्थी ॥

* The root ख्या is used only in the following tenses and moods: —लट्, लङ्, लिङ् ।

‡ It is Past Perfect in the Passive from हृ with वि and आ । पिशितं मांसं आचामति इति पिशाचः ॥

EXERCISE 64.

किं त्वमाराममेष्यसि मालती पुष्पाणि चानेष्यसि ? यदि त्वं मे आस्तरणं गन्तुं कथयसि नाहमेष्यामि । न कोपि मृषावादिनो वचनानि श्रद्धास्यते यद्यपि तानि सत्यानि स्युः । शकुन्तला पुरूरवसमप्राक्षीत्" कदा भवान् मां राजधानीम् आनेतुं दूतं विस्रक्ष्यति" ? वयं त्वरिष्यामहे प्रयाणाय चाद्यैव निशामुखे संनत्स्यामहे । यदि त्वं † वृक्षशाखाश्छेत्स्यसि तर्हि किं तव स्वामी ते नैव क्रोत्स्यति ? भो सुहृद् ! योयं प्रसादो मयि प्रदर्शित स्तमहं कृतज्ञतया स्मरिष्यामि । "पितुरादे-

तदेन्द्रो देवेशः आगतवान् अहल्यालावण्यञ्चावलोक्य † तामचीकमत् । इन्द्रो मुनिवेषमकरोत् परमहल्या तं मघवन्तमभिजज्ञौ तस्याभिलषितञ्च स्वीचकार । तदनन्तरं सा अगादीत्—"हे विडौजः ! अतो निर्गच्छ मामात्मानञ्च त्रायस्व"। सवेपथुरिन्द्रस्तस्मादुटजात्पलायिष्ट । परं प्रत्यागच्छन्तं मुनिरञ्चैक्षत । तापसव्यञ्जनोपेतमभिपन्नं सुनासीरं * मुनिर्झटित्यभ्यज्ञासीत् । गृहमागत्य स निजां पापां दारान् शशाप—"त्वं शश्वदत्र वनराजौ तिष्ठेः । न कोऽपि त आकृतिं द्रक्ष्यति । यदा दाशरथिरनया वनपङ्क्त्या यास्यति तदा तस्य पादयोः स्पर्शस्तव किल्बिषं विनेष्यति ते पूर्वां द्युतिञ्च दास्यतीति"। ततो मुनिः प्रालेयाद्रिमशिश्रयत् तत्रासंख्यसंवत्सरान् तिग्मतपांसि चकार ॥

शतक्रतो

—जान

पान

—चा

NOTES ON EXERCISE 68.

† अचीकमत् is Aorist from कम to desire.

सुष्ठु नासीरं सैन्यस्याग्रभागोयस्य स सुनासीर इन्द्रः ।

* सं+ज्ञा to to christen; to name. अनु+ज्ञा to allow. वि+ज्ञा (C) to request. प्रति+ज्ञा, to pledge. अप+ज्ञा to deny.

EXERCISE 69.

कस्मिंश्चित्कानन आसीन्महान्न्यग्रोधपादपः । तस्य कोटरे वहवः कपोता ऊषुः । तत्र विवरे तस्थुषा † दन्दशूकेन तेषां पृथुकाः सर्वदाखादिषत । एकदा शोकरवं श्रुत्वा कपोतेनैकेनोक्तम—"नकुल स्थानादारभ्य आसर्पविवरात्पिशित शकलानि यथाराजि धत्त तदा नकुलोऽवश्यमेव * मांसं भक्षयितुं गमिष्यति, आशीविषं द्रक्ष्यति हनिष्यति चेति"। तथा कृते तथैवोद्भूतम्। परं नकुलः कपोतानां रुतमाकर्ण्य तरुमारुरोह शावकांश्चखाद । अस्या गाथाया अयमुपदेशः—उपायं चिन्तयन् प्राज्ञो ह्यपायमपि चिन्तयेत् ॥

आर्तस्वरं ... इति इयमुपदिशतीयं कथा—

NOTES ON EXERCISE 69.

† पौनः पुन्येन भृशं वा दंशति इति दन्दशूकः ॥

सर्पति इति सर्पः, *i. e.*, one who crawls; a reptile, *i. e.*, a serpent.

* Flesh=मांसं, पललं, पिशितं, तरसं, क्रव्यम् ।

EXERCISE 70.

द्रुपदो भूमिपः स्व सुताया द्रौपद्याः स्वयंवरमारेभे । पानीयपूरपूरितामत्रस्योपरिष्टाद् व्यापाद्यमानो मत्स्यः

स्य शिरश्चिच्छेद । यदा अश्वत्थामा पितुरवसानमश्रौषी-त्तदात्यर्थं क्षुब्धोऽभूत् । परं कृपाचार्य्येण शमितः । यूना योधेनाभिहितं "दुर्योधनमुपगमिष्यामि तं सैनान्यंस्य च प्रार्थयिष्ये । अतस्तावुभौ नृपं द्रष्टुं निश्चिक्यतुः । दुर्योधन-स्तु प्रागेव तां पदवीं कर्णाय समर्पितवानासीत् । कर्णश्चा-श्वत्थामानं रक्ताशाक्तनयनं (वाष्पदूषितलोचनं) दृष्ट्वा तमधिचिक्षेप † । अयमपि योधस्तस्य प्राकृतकुलजनिं वल-वन्निनिन्द । ततो महज्जन्यं वभूव । द्वावपि खड्गानाकार्षि-ताम् । परं कृपदुर्योधनौ तावाजिमरुध्यताम् । अश्वत्थामा प्रतिजज्ञौ "यदहं कदाचनापि कौक्षेयकं न स्प्रक्ष्यामि" । तस्मिन्नेव क्षणे 'दुःशासनो भीमेनहतः' इति रावोऽश्रूयत । सहसैवप्रौढवयस्को वीरः खड्गमकार्क्षीत् उदीरयामास च "एष आगच्छामि तव संरक्षणायेति" । अत्रान्तरे भीमस्त द्रुधिरलिप्ततनुः सन् दुःशासनं जघान ॥

NOTES ON EXERCISE 66.

† क्षिप with अधि means to censure; to blame. नि+क्षिप means to store; to deposit. सम्+क्षिप to summarise.

आ+क्षिप to attack; to make an assault.

EXERCISE 67.

यदा दिव्यास्त्रै रामस्ताडकां जघान तदोद्गीर्णा गाधिसुतेनेमा व्याहृतयः—"हे शौर्य्यशालिन् क्षत्रिय! नितरां प्रसादितोस्मि भवता। त्वं सर्वत्र विजयी भूयाः। अद्याहं तेऽतिरिक्तान्यायुधानि दास्यामि, गृहाण तानि। यत्रकुत्रचिदपि प्रपद्येथास्त्वं, विपक्षान् पराजेष्यसे सविजयश्च प्रत्यागमिष्यसीति। यदा त्वं तैः समेतस्तदा नोत्सहेत कश्चिज्जनस्तवान्तिकमागन्तुम"। इति प्रोच्य स ऋषिः कतिपयान् मन्त्रान् जजाप, तत्समकालमेव नृपसूनोः पुरस्तात् सज्जीभूतान्यायुधानि तस्थुः। तानि राममूचिरे "रघुकुलप्रसूत! सुसदृश सन्तते! पश्य वयं ते चरणयोर्नमामः। अद्यारभ्य वयं ते आज्ञाकारिणो भृत्याः। सर्वत्र त्वामनु गमिष्यामः"। रामश्च तेषां कैङ्कर्य्यमङ्गीचकार, आयुधदातारं मुनिञ्च तुष्टाव॥

NOTES ON EXERCISE 67.

किंकरस्य भावः कैङ्कर्य्यम्=service.

EXERCISE 68.

गौतमश्चाहल्या च बहूनि वर्षाणि सुखमेधेतेस्म। एकस्मिन् वासरे काष्ठानि यवसञ्चावचेतुं मुनिर्वहिर्जगाम।

सामेधः कुशाश्चाहर्तुं

(सामित्कुशा वा)

स्थापितः । यो वारिणि दृष्टिं पातयित्वा मत्स्यशिरो निर्विध्येत स द्रौपदीं परिणेष्यतीति । बहवो नृपतयः प्रतिज्ञानमिदं श्रुत्वा तस्मिन् क्षणे आजग्मुः । अर्जुनश्चापि सचतुर्भ्रातृकस्तत्राययौ । परं ते सर्वे ब्राह्मणवेषधारिण आसन् । सर्वे नृपा मत्स्यं लक्ष्यभेदं हन्तुमयतन्त परमुद्योगे मोघक्रिया बभूवुः । अर्जुन उत्तस्थौ, उवाच च "यदहमधुना यतिष्ये" । "तथास्तु" इति द्रुपदेनोदाहृतम् । अर्जुनो निमेषमात्रे कालेन मत्स्यशिरश्चिच्छेद । क्षत्रियाणां पश्यतामपि † स द्रौपदीमुपयेमे ‡ । क्षत्रिया ऊचुः "कोयं ब्राह्मण इति ? वयं तेन सह योत्स्याहे । द्रौपदीञ्च ग्रहीष्यामः" । इदमुक्त्वा तेऽर्जुनमाजुहुविरे * । अर्जुनश्च तस्य भ्रातरश्चैतान् सहेलं × पराजिग्यिरे नवोढाञ्च गृहं निन्युः । गृहे प्रवेशकाले ते जगदुः— "मातः, अद्यास्माभिर्विपुला भिक्षा प्राप्ता" । मातोवाच— "प्रियास्तनूजाः । यूयं स्वमध्ये एतां विभजत" । इत्थं द्रौपदी पञ्चानां पाण्डवानां पत्नीत्वं प्रपेदे ॥

NOTES ON EXERCISE 70.

लक्ष्यभेदं is the Namulant form.

† अत्र अनादरे षष्ठी, here the Genitive is used in the sense of indifference shown to other Kshattris. ‡ उपाद्यमः स्वकरणे, इति तङ् ।

* By Pân :—स्पर्धायामाङः, *i. e.*, the root ह्वे with आ meaning to challenge takes the Atmanepada.

× By Pân :—विपराभ्यां जेः, the root जि with the prepositions वि and परा takes the Atmanapad.

N. B:—इत्थं is formed by Pân:—इदमस्थमुः, *i. e.* to इदम् the suffix थमु is added.

EXRECISE 71.

एकस्मिन्नहनि कश्चिद्बालो गोविन्दमुवाच । "किं ते रथ्यायां क्रीडनं न रोचते ? किमिति यदस्मासु क्रीडत्सु त्वमधीषे" ? गोविन्देन प्रत्युक्तम् "मे जनको मामुपदिशति यद्यौवनं महार्हः समयः । न ह्यस्माभिस्तस्मिन्ननेहसि क्रीडितव्यं किन्तु विद्योपार्जनमेव कर्तव्यम् । यदि वयमधुना विद्यां सञ्चिनुम *स्तर्हि परिणतेवयसि नावसत्स्यामः परं यदि खेलामोऽध्ययनञ्च नैव कुर्मस्तदा शोचिष्यामः" । बालानां मध्ये एको गोविन्दवचः श्रुत्वाकथयत् "सत्यमभिहितं भवता, अद्यारभ्य (मुधैव) क्रीडां हास्यामः" ॥ बालाः ! यदि कश्चित्क्रीडाशीलो बटुर्युष्मान् क्रीडार्थमाकारयति † तर्हि तथोत्तरं दत्त यथा गोविन्दस्तेभ्योऽदात् ॥

NOTES ON EXERCISE 71.

* चि to collect with नि means to fill; सम्+चि to store up; वि+चि to search; उप+चि to increase; अप+चि, to decrease; परि+चि to be acquainted with; निस्+चि to believe, to resolve; अव+चि to pluck up.

N. B:—अव+चि has two forms in the noun, अवचयः and अवचायः । † It is the causal of कृ to do with आ ।

EXERCISE 72.

आसीत्परशुरामस्य मथुराख्या स्वसा । सा च भ्रातुः कनीयसी परं तस्मात्प्रवीणतरा । प्रत्यहं सा पाठशालामगात् स्वपाठांश्चाशिक्षत । परशुरामस्तु तन्द्रालुः कलहप्रियश्चासीत् । यत्किञ्चिदपि मातादिदेश तत्क्षणमेव तच्चकार मथुरा । एकदा तस्या भ्राता तां बभाषे—"पाञ्चालिकेयं गृह्यतां क्रीडनायेति" । सोत्तरं ददौ—"भ्रातः, कथं वयमन्यस्य वस्तु विना तस्यानुज्ञया ग्रहीतुं क्षमाः ? यदि वयमिमां गृह्णीमस्तर्हि 'वयं पाटच्चरा' इति लोका निर्णेष्यन्ति । तयोः पिता यदृच्छया दुहितुरिमानि वचांसि शुश्राव जगाद च—"सुष्ठूक्तं भवत्या मथुरे ! त्वं चतुरा कन्यका । इमामन्यां पुत्रिकां गृहाण । अहं परशुरामाय किञ्चिदपि न दास्यामि

यतो हि स दुर्वृत्तो बालकः" ॥ बालाः ! मथुराया वाक्यानि सम्यक् स्मरत । मा गृह्णीत कस्यचित्स्वं तदिच्छां विना ॥

EXERCISE 73

"गोविन्द ! उत्तिष्ठ, वेलेयं पाठशालां गन्तुम् † । ते सुहृदो बहिस्त्वामाकारयन्ति । यदि त्वं कालातिक्रमेण यास्यसि किं तवाध्यापकस्ते नैव कोपिष्यति ? स त्वां प्रहरिष्यतीति मे मतिः । त्वदीयाः सुहृदः पूर्वं गमिष्यन्ति पाठांश्च शिक्षिष्यन्ते, त्वञ्च ताडयिष्यसे । किं त्वमनेन न जिह्वेषि ? सद्वृत्ता विद्यार्थिनो यथावसरं विद्यालयं गच्छन्ति अवहितचेतसा पाठांश्च स्मरन्ति अध्यापकात् श्लाघाञ्च लभन्ते । अन्ये सहाध्यायिनस्त्वया सहोपहासं करिष्यन्ति । स्थूलबुद्धिर्बालको न पितृभ्यां नचाध्यापकाय रोचते । पश्य उदितो भगवान् मरीचिमाली, तूर्णमुत्तिष्ठ, पाठशालाञ्च याहि" ॥ × बालाः ! गोविन्द इव पाठशालां गमने मन्दा मा भूत ॥

NOTES ON EXERCISE 73.

† By Pân:—कालसमयवेलासु तुमुन्, *i. e.*, the Infinitive is also used with words having the sense of 'it is time to do any thing.'

कालातिक्रमः=कालातिपातः । •

EXERCISE 74.

एको बालको बदरनिचितं भाजनं लुलोके । अमत्रस्य शिरोऽश्च चातीव ह्रस्वासीत् । "बदराणि भोक्तुमुद्ग्रहीष्यामि इति" बालकेन निगदितम् । ततस्तेन स्व हस्तः प्रसारितः, गृहीतानि च बहूनि बदराणि । परं स करमुद्धर्तुं नाशकत् । "कथं तावन्ति बदराणि एकपदे ग्रहीतुं समर्थः ? कतिपयानि गृहाण, तव पाणिश्च बहिरायास्यतीति" समीपवर्तिना पित्रा व्याहृतम् । पित्रुपदेशेन स केवलं पञ्चैवाग्रहीत् स्वहस्तञ्च सलीलमुदकर्षीत् । † "मम कृते पर्याप्तानीमानि, अधुनाहं तानि भोक्ष्य" इति बालकेनोक्तम् ॥ बालाः ! लोलुपा मास्म भवत ॥

NOTES ON EXERCISE 74.

† कृते governs the Genitive. । अशकत् is Aorist from शक्लृ to be able to.

N. B:—अग्रहीत् is Aorist from ग्रह (उपादाने) to get; catch, etc.

EXERCISE 75.

एकदा माणवकेन सौवर्णमुद्रा भूमौ पतितावलोकिता तेन धृतैषा उक्तञ्च—"यदहमिमां स्वपार्श्वे निधास्यामि न

कश्चिज्जनो ज्ञास्यति यन्मया प्राप्तमिति"। परं स सम-
कालमेव स्वपितृगुर्वोर्वचनं सस्मार—'यद्यपि त्वमीश्वरं न
पश्यसि परं स त्वामवलोकयतीति'। इत्थं विचिन्त्य स
मुद्रास्वामिनं विचेतुमयतत। पथा गच्छन् स एकं निर्धनं
स्वनष्टमुद्रिकां विचिन्वन्तं ददर्श। "किमर्थमनुसंधान-
परायणोऽसीति" वटुरवोचत्। स्वर्णमुद्रामन्विच्छामीति
दरिद्रेण प्रत्युक्तम्। "गृह्यतामियं, मार्गे मयोपलब्धेय" मित्य-
भिधाय * तां तस्मै दरिद्राय समर्पितवान्, स दरिद्रश्चा-
तीव हृष्टः सन् गृहमाटिटीके † ॥

NOTES ON EXERCISE 75.

† आटिटीके is Past Perfect from टीकृ to go with आ.

* The following are the most useful prepositional uses of the root धा :—

अभि+धा=to say; पि+धा=to close; परि+धा, to wear; सम्+धा=to make peace with; वि+धा=to do; नि+धा=to store; to hoard; अव+धा=to pay attention to; तिरो+धा=to disappear; अनु+सम्+धा= to make research or simply search.

EXERCISE 76.

पुरा किल भालुकः पुरुषश्च परस्परं सौहार्दं सिषेवाते उभौ काननेऽभ्रमताम्। मध्याह्ने तौ वृक्षच्छायायां न्यषीदताम्। पुरुषश्च श्रान्तो भूत्वा निद्रामवाप परं स सुष्ठु प्रमिलां न लेभे यत एका मक्षिका मुहुर्मुहुस्तस्य मुख उपाविशत्। दृष्ट्वेदं भालुक आत्मन्यचिन्तयत् यदहं स्वमित्रं सेविष्ये वेदनादायिनीं मक्षिकाञ्च हनिष्यामि। इत्युक्त्वा स उद्धृतेन पादेन तस्य मुखे प्रजहार। मक्षिका खलु तदाघातेन ममार, परं तन्मित्रवक्त्रमपि दीर्णतां † प्रपेदे॥ प्रत्येकमनुग्रहं सुप्रयोगतः कुरु॥

NOTES ON EXERCISE 76.

† The following are the most useful prepositional uses of root पद्, 4th Conj. Atmanepad :—

आ+पद् means to go back to; to recover; वि+पद् to be distressed; व्या+पद् to kill (causal); सम + पद् to be well–to do; प्रति+पद् to accept; उप + पद् to be fit for; to be worthy of; निस्+पद् to result from.

EXERCISE 77.

एकस्मिन् † वासरे मे सुहृन्मामुपेत्य वासितं मृत्खण्डमेकमदात्। तस्यामोदेन हृष्टो भूत्वाहं तं सम्बोधितवान् "किं त्वं कस्तूरी ? ते सौरभं नितरां रुचिरम्। आख्याहि कोऽसीति ? मृत्खण्डश्च मे प्रश्नसारं बुद्ध्वा प्रत्यवादीत् "भगवन् नायं मे नैसर्गिकः परिमलः। जपापुष्पं अहरुच्चैकत्रावसाव। एतस्मात्सम्पर्कान्मयोपलब्धोयमामोदः। अत एव नेयं मे सौरभस्य प्रशस्तिः किन्तु जपापुष्पस्येति" ॥

तव

NOTES ON EXERCISE 77.

† Day=अहः, घस्रं, वासरः, वारः दिनं; दिवसः ॥

EXERCISE 78.

कस्यचित्पुरुषस्य प्रत्यहमेकैकं सौवर्णमण्डं प्रसुवाना काचिद्धंसी बभूव। लोलुपस्स नरस्तेन न तृप्तवान्। स हैमानि तान्यण्डानि युगपदेव लब्धुमैच्छत् (ऐहिष्ट)। ततः स हंस्या हनने कृतनिश्चयः (बद्धसंकल्पः) संस्तां हतवान्। किन्तु तस्या उदरान्न किञ्चिदपि लेभे, तेन, भृशं शोकार्णवे न्यमाङ्क्षीत्। एवं तस्य प्रतिदिनं प्राप्तं तत्काञ्चनाण्डं सा हंसी च व्यनश्यताम् ॥ अत उच्यते यो लोभाद्यतते

लब्धुं युगपद्धनम् । भूतार्थास्तस्य नश्यन्ति तस्माल्लोभं विवर्जयेत् ॥

EXERCISE 79.

कस्यांचिद्विभावर्यामेकोऽन्ध एकस्मिन हस्ते कुम्भमन्यस्मिन् दीपञ्च गृहीत्वा रथ्ययागच्छत् । कश्चन वैधेयः प्रतिपदं स्खलन्तं तमन्धं दृष्ट्वावादीत् "मूढानेन दीपेन किं ते प्रयोजनम् ? हस्तेन दीपं नयन्नपि त्वं पदे पदे स्खलसीति"। सोऽन्धस्तद्वचनेन रोषं प्राप्त एवं प्रत्यभाषत "सुहृत्किमर्थमनेन निजकरेणेमं दीपं धारयामीति किं न बुध्यसे ? मया धार्यमाणमिमं घटं त्वं पश्यसि, यद्यहं दीपं ननियेयमस्यां तमिस्रायां तदा त्वमिमं घटं भिन्द्याः— तस्मादेष प्रदीपो न मम प्रयोजनाय परं त्वादृशानामविनीतानामिति"॥ तत्प्रतिवचनमाकर्ण्य स बालिशः स्वीयाविनयेन ह्रीतोभूत्वा तमन्धमपराधक्षमां याचमानस्सन्निभृतमधावीत ॥ मौर्ख्येण निन्द्यो न कदापि कश्चित् ॥

EXERCISE 80.

पुरा किलैको विचक्षणस्तार्किको नृपमुपजगाम । राजा तस्य विपुलविद्यया प्रसन्नो भूत्वाकथत्—"भगवन् !

प्रश्नमेकं प्रष्टुकामोहम् † । प्रतिवचनं दातुमर्हति अर्हन् । क ईश्वर इत्याख्याहि"। दुर्ज्ञेयश्चासावनुयोग इति विज्ञाय तत्वज्ञोऽस्योत्तरं निश्चेतुमेकस्य दिवसस्यावकाशं नृपमयाचत । विज्ञप्तिरियञ्च तदीया स्वीकृता । आगामिनि वारे तस्मान्नृपेण यथापूर्वं प्रश्नो जिज्ञासितः । परं तत्वज्ञः प्रतिवक्तुमशक्तो द्वयोर्दिवसयोरवकाशाय प्रार्थयत । इमामपि प्रार्थनां झटित्यङ्गीचकार राजा । बहुतिथे काले च गते नृपः सामर्षस्तमाहूय राजसंसदि उवाचेदं वचः, "अद्यावधि प्रतारिता वयं भवद्भिः । त्वयाधुना प्रश्नस्योत्तरमवश्यमेव दातव्यम्" । स विपश्चित्सविनयं न्यवेदयत् । "क्षमस्व महाराज ! यथा यथेश्वरं चिन्तयामि तथा तथाल्पमेव जानामि" ॥

NOTES ON EXERCISE 80.

† अर्हं in the sense of अस्मि is अव्यय, an indeclinable.

किल वार्तायाम्. It has the sense of once upon a time; It is heard etc.

EXERCISE 81.

स्वप्नसन्दर्शन

एको नृपः स्वप्ने दृष्टवान् "यदहं नितान्तं भग्नदन्तः"। दुर्निमित्तमिदमिति मत्वा † दैवज्ञमाहूय तस्य प्रश्नस्यार्थमप्राक्षीत्। तेन कथितं—अशुभोऽयमर्थः। आत्मीयनिधनात्प्रागेव देवपादानां पुत्रा मरिष्यन्तीति। राजा रोषं प्राप्तस्तं कारागारे पातयितुमादेशं प्रदायान्यं दैवज्ञमाह्वयत्। तस्य स्वप्नस्यार्थञ्च पप्रच्छ। दैवज्ञेन नृपशीलस्याभिज्ञेन हर्षोत्फुल्लवदनेनोदितं—स्वप्नोऽयम् अतिशुभः। भगवान् सर्वान् बन्धूनतिजीविष्यतीति। तदा नृप आनन्दस्य परां काष्ठां गतः, दैवज्ञाय च बहूनि पारितोषिकाणि ददौ॥ दुराराध्या राजानः। त्वं राजवल्लभो भवितुं कामयसे चेत्तर्हि तेषां छन्दानुवृत्तेन वर्तितव्यं त्वयेति॥

NOTES ON EXERCISE 81.

† The Sanskrit words for दैवज्ञ (astrologer) are :—

सांवत्सरः, ज्योतिषिकः, मौहूर्तिकः, कार्तान्तिकः, गणकः। *N. B*:—अभिज्ञ governs the Genitive.

EXERCISE 82.

आसन्नव्यसनाः पाण्डवाः सर्वासु युत्सु पराभूताः (अभिपङ्गं प्राप्ताः)। एकस्मिन्नहनि अर्जुनो (किरीटी) व्यासससमीपमित्वा स्वकामवस्थामवादीत् जगाद च "भगवन्, वयं हरिणास्माकं बलेन कान्त्या च विरहिताः। अतो वयं तृणमिव निर्बलाः। स्त्रियोपि अस्मासु बाणान् क्षेप्तुं नः पराजेतुञ्च शक्नुवन्ति । न केवलं वयमेव परं सकलश्च संसारः शौर्य्यशालिना कृष्णेन विना दुःखमाप्नोति। शोभाविरहितश्च वर्तते । हरिगमनादारभ्य † समाजय्य चापस्त्रिभुवनविख्यातः कृषकाणां यष्टिभिः पराजितः । यदहं निर्बल इति मां न विस्मापयति । अहमधुनापि प्राणिमीत्याश्चर्य्यम् । संप्रति त्वमेवासि शरणमस्माकम् । हे पितामह ! अनुगृहाण भवतः पुत्रानस्मान् । अस्यां शोच्यावस्थायां किमस्माभिः कर्तव्यमिति निर्दिश चेति" ॥

NOTES ON EXERCISE 82.

† By Pân:—क्षय्यजय्यौ शक्यार्थे, क्षय्य and जय्य are irregularly formed. जेतुं शक्यं जय्यम् ।

N. B:—चाप is both Mas and Neuter.

+ प्रनश्चेति सूत्रस्य त्वव्ययीभाव एव विषयः।

EXERCISE 83.

मुमूर्षुणा स्थविरेणैकेन स्वपुत्राः समाहूय संबोधिता यथा—"प्रेष्ठा मे तनूजाः, यद्यस्यां जगत्यां यूयं सहर्षं जीवितं वर्तयितुकामास्तर्हि मिथः सप्रेम वर्तध्वम्। कदापि कलहं मा कार्ष्ट, यतः कलिरेव नाशमूलम्! सत्यं वदत, सत्यप्रियाणाञ्च संसर्गं कुरुत, दुर्जनानां गोष्ठीं मा गमत, धर्म्मस्य सरणीमनुसरत। विपदाभिभूतान् † प्रतिवेशिकानुपकुरुत। यदि यूयं कारुण्यं करिष्यथ तर्हि ते युष्माकं विपदि साहाय्यं करिष्यन्ति। यदि यूयं किञ्चित्कार्य्यं सम्पादयितुमीहध्वे तदैक्येन कुरुत, यतः संहतिरेव कार्य्यसाधिका, इति स्मरणीयम्। धर्म्मकृत्यानां वीजानि वपत येषां फलानि परलोके (अमुत्र) लप्स्यध्वे, जन्ममरणादिदुःखान्मोक्ष्यध्वे। विद्यामुपार्जितुं यतध्वम, यतोहि विद्यैव धनस्य शाश्वतः प्रभवः, रजतस्वर्णवन्नैवापह्रियते। यावच्छक्यं स्वकीयोद्योगाधीना भवत यतो दैवं पुरुषकारेणैव साध्यसिद्धिनिर्वन्धनम्"॥

NOTES ON EXERCISE 83.

† अभि+भू meansto overpower; परा+भू=to defeat; to humiliate; अनु+भू=to experience; वि+भू=(causal) to know; प्र+भू=to have effect upon.

पुस्तकस्थपाठानुकृतिरियं सम्पूर्णा॥

University Papers. (Translation).

1913.

Translate into Sanskrit :—

The period of 13 years agreed upon passed away, still Duryodhan would not give back to the Pandvas their Kingdom. At this, the Pandvas finding no other means began to make preparations for war against the Kauravas, their enemies. Grand preparations were being made on both sides. Almost all the Kings of India joined either the one or the other side, and the struggle set in at a place Kurukshetra. A great battle like this had never before been fought in India. It lasted for 18 days. The Kauravas fell one by one in this battle, King Dhritrashtra and his queen being the only survivors.

अनुवादः

यद्यपि सुनिश्चितस्त्रयोदशाब्दपरिमितकालो व्यतीयाय, तथापि दुर्योधनः पाण्डुपुत्रेभ्यो राष्ट्रं न ददे । एवमवस्थिते सति पाण्डवा अन्यतरं प्रतीकारं नोपलभ्य कौरवैर्द्विषद्भिराहवाय संभारान् कृतवन्तः । उभयस्मिन् पक्षे महान्तः संभारा अक्रियन्त । भारतवर्षीयाः प्रायः सर्वे नृपतयः पक्षमेकमन्यतरं वा समर्थयामासुः । कुरुक्षेत्रे जन्यं समारब्धमभूत् । एतादृशो

महान् संमर्दो भारतेवर्षे कदापि पुरा न ददृशे। अष्टादशवार-पर्य्यन्तं अजिरयं ववृते। अस्यां युधि कौरवा एकैकशः सर्वे-ऽवसानं लेभिरे (अस्मिन् विग्रहे कौरवा एकैकशो विगत-विग्रहा बभूवुः)। धृतराष्ट्रस्तस्य महिषी चैव तानत्य-जीवताम्॥

1914.

Translate into Sanskrit :—

A man having a pain in the stomach went to a physician and said, "For God's sake, Doctor, give me some medicine, otherwise I die from a pain in the stomach." The doctor asked him what he had eaten that day. The man replied, "Only a piece of burnt bread." On hearing this, the doctor said, "Let me look at your eyes." Then, having called one of his servants, he said, "Bring me the medicine for the eyes." The sick man, on hearing this, screamed out, "O Doctor, is this a time for your joking? I am dying from pain in the stomach and you talk of the medicine for the eyes. What connection is there between medicine for the eyes and a pain in the stomach?" The doctor replied, "I wish, in the first place to make your eyes sound, for it is evident that you are unable to distinguish between black and white, otherwise you would never have eaten burnt bread."

अनुवादः

कुक्षौ व्यथ्यमानो मनुष्यो भिषजमेकमुपेयाय व्याजहार च "ईश्वरार्थं वैद्य! देहि म औषधम्, अन्यथाहं वेदनयानयावसन्नो भवामि"। वैद्यस्तम्पप्रच्छ "त्वयाद्य किमशितम्"? स प्रत्युवाच "प्लुष्टरोटिकाशकलमेवाशितं मया"। इदमाकर्ण्य वैद्यः समूचे "तव दृशौ निरीक्षे"। भृत्यानामेकतरं समाहूय समादिदेश "नेत्रागदमानय"। व्याधितो मानवः श्रुत्वेदं चक्रन्द, वैद्य! अप्युपहासार्थं समयोऽयम्? अहन्तु औदरिकव्यथया म्रिये भवांश्च नयनार्थमगदं कथयति। नेत्रागदोदरव्यथयोः कः सम्बन्धः"? पुनर्वैद्य इदमुत्तरं प्रादात् "प्रथमतस्त्वहं त्वन्नयने निरामये कर्तुमीहे, यतोहि सुस्पष्टमेवैतत यत्त्वं धावल्यकार्ष्ण्ययोर्भेदं प्रतिपादयितुं न शक्नोषि नोचेत् त्वं कदापि दग्धखण्डं नात्स्यः"॥

1915.

Translate into Sanskrit :—

(1) It is still raining. We cannot go out for a stroll now. (2) You should always try to acquire a practical knowledge of the language you study. Practise speaking in simple and easy Sanskrit from to-day. (3) Calcutta has been called 'the city of

palaces.' (4) Name the chief town situated at the junction of the Ganga and the Yamuua. (5) I have not seen you for a long time. How have you been keeping ? Were you out of town last week ? (6) He is a good host. His hospitality knows no bounds. (7) The Upanishads are the earliest record of the philosophical thought of India. (8) Give up all fear now. All those demons who were at war with the gods, have been thoroughly crushed and the royal sage has returned unhurt. (9) Let me congratulate you most heartily. Your desire has been completely realized. May God bless you ?

(10) Happiness is particularly welcome when it comes to us after misery. The sight of a lamp is particularly pleasing when we are groping in dense darkness. The cool shade of a tree is particularly delightful to one who has been troubled by the scorching heat of the sun.

अनुवादः

(१) अधुनापि वर्षति वारिवाहः, वातमासेवितुं बहिर्गन्तुं न शक्नुमः । (२) यां कां भाषामधीते भवान् तामेव सदैवानुष्ठानतो ज्ञातुं यतताम् । अद्यारभ्य सरलया सुगमया च देववाण्या वक्तुमभ्यस्यस्व । (३) कलिकाता सौधनगरमित्यभिधीयते । (४) गङ्गायमुनयोः संगमे स्थितं किञ्चित्प्रथितं नगरं कीर्तय । (५) भूयसः कालान्न

दृष्टोसि । कुशलोदन्तमाख्याहि । किं त्वमतीते सप्ताहे ग्रामाद्बहिरासीः ? (६) शोभनोयमातिथेयः, सीमातीतञ्च तस्यातिथ्यम् । (७) उपनिषदो भारतवर्षस्य प्राक्तनास्तात्विकलेखाः सन्ति । (८) संप्रति विश्रब्धा भव । निर्जरैः सह युध्यमाना दानवाः सुतरां पराजिताः, प्रत्यागतश्चापरिक्षतशरीरो राजर्षिः । (९) अहं भवन्तं हार्दं सभाजयामि । अभीष्टसिद्धौ सकामः सञ्जातो भवान् । ईश्वरस्त्वां वर्धापयतु । (१०) यत्सुखं दुःखादुपनतं तद्रसवत्तरमेव भवति । यदा वयं सान्द्रे तमसि स्खलामस्तदा दीपदर्शनं विशेषतो रुचिकरं भवति । तरुच्छाया मार्तण्डप्रचण्डाग्निना तप्तस्य नरस्य विशेषतः शान्तये भवति ॥

1916.

Translate into Sanskrit :—

(1) As you are suffering from a strong headache, you will not be able to attend office to-day. (2) An old class-fellow of mine who has just returned from England after completing his medical studies was, on his return, given an excellent reception. (3) Can you oblige me by lending me your book ? I shall return it as soon as I have done with it. (4) The town of Khonamusha, where the famous poet Bilhana was born and brought up, is now a village of no

consequence. (5) Had you done everything after deliberation, you would not have come to repentance. (6) When I went to see him he abused not only me, but my friends also. (7) One should not bear hatred towards a Brahmana who has studied the four Vedas and has seen the end of the six philosophies. (8) Fear the Almighty God, all the days of thy life, and walk in the path of righteousness. Good works will give thee everlasting happiness. (9) Alas, calamities never come singly to those on whom Fortune has turned her back. (10) He who wishes to acquire wealth and rise in power shuns idleness as his enemy. The idle man is a burden to himself. His days pass away like the shadow of a cloud and he leaves behind him no mark for remembrance.

अनुवादः

(१) यतस्त्वामतीव शिरोवेदना वाधतेऽतस्त्वं कार्य्यालये नोपस्थितो भवितुमर्हसि। (२) पुराकालिको मामकः सहाध्येता वैद्याध्ययनं समापयित्वा साम्प्रतमेवाङ्गलभूमेरागतः, निवर्तमानस्य च तस्य महती सत्कृतिरभूत्। (३) स्वकीयं पुस्तकं मे प्रदाय मामनुग्रहीष्यसि ? अभीष्टसम्पादनं विधाय पुनरहं दास्यामि। (४) खोनमूशो नामाधिष्ठानं यत्र विततकीर्तिर्विलहानः कविर्जनिं शिक्षाञ्च लेभे तदेवाधुना ख्यातिरहितो ग्रामो वर्तते। (५) यदि प्रत्येककार्य्यं सुविचार्य्याकरिष्यस्तर्हि परिदेवनां नावाप्स्यः। (६) यदाहं

तं द्रष्टुमयासिषम्, तदा स न केवलं मामश्लीलमवादीत् परं मदीयान् सुहृदश्चापि। (७) अधीतचतुर्वेदं षड्शास्त्र-पारगं भूदेवं न द्विष्यात्। (८) यावज्जीवं सर्वशक्तिमत ईश्वराद्बिभीहि, धर्म्यां सरणीमनुयाहि। सुनिर्मिता ग्रन्थास्ते शाश्वतमानन्दं प्रदास्यन्ति। (९) अहो दैवदुर्विपाकान् विपदः सन्ततमापतन्ति। (१०) यो द्युम्नमुपचेतुमभिल-षति सामर्थ्यञ्च द्रढयितुं स्पृहयते स निर्व्यापारत्वं शत्रुवत् जहाति। निर्व्यापारो मानव आत्मभारहार एव। तस्य वयो-ऽभ्रच्छायेव याति, निधनपश्चात् स किञ्चिदपि स्मारकं न विसृजति॥

पूर्तिमगादयं

पञ्चनदविश्वविद्यालयपरीक्षापत्राणां संस्कृतानुवादः।

समाप्तश्चायङ्ग्रन्थः॥

शुभं भूयादध्यापकानामध्येतॄणाञ्चेत्योम्॥

Errata. (शुद्धिपत्रम्)

Page	line	read	for
३	४	भूषाभिः	मूषाभिः
४	१६	पुष्पाग्रया	पुष्पाग्र
६	१	भीषणो	भीषणा
८	६	तस्यानवधान	तस्य । नवधान
१४	१६	प्रासाद	प्रासादा
१७	४	शिलास्रुपविशतः	शिलाभ्रूपविशतः
,,	१२	श्लाघामहे	श्लाघ्यामहे
२३	१२	निरमायि	निर्मायि
२८	१४	नैकट्यं	नैकय्यं
३०	४	श्लाघस्व	श्लाघ्वस्व
३९	६	कनीयसां	कनीयसा
४८	७	प्राप्नुतां	प्राप्नुवातां
५३	१२	दोग्ध्रेवा	दोग्धा
५४	५	कुरुत	कुरु
७२	११	यदाग्यो	यनाग्यो
८०	१०	गर्हितं यथा स्यात्तथा	पौनः पुन्येनभृशं वा
,,	,,	दशति	दंशति

Can be had from :—

The Puajab Printing Works Book Depot,

GANPAT ROAD,

ANARKALI, LAHORE